Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

०४०५६९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080569

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Acc No.
RT-0498

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Reg. No. C. 1075.
माघ — ९म संख्या
Digitized by Arya Samaj Foundation Chennai and eGangotri
January 1924. Vol. VI. No. 9

संस्कृतपरिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः--श्रीजानकीनाथसाहित्यशास्त्री ।

सभापतिर्मन्त्रप्रयाणम्	३२१	चन्द्रालोकम्	३४१
शोकसभा	३२३	आवेदनम्	३५४
शोकरुदितम्	३२४	समालोचनम्	३५७
शास्त्रमानवस्थम्	३२५	सन्देशाः	३५८

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यन्ते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, वागबाजार, कलिकाता ।
अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই অসমৃদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে। কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত। অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ, তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২৷৷০ টাকা। ডাকমাশুল ও প্যাকিং ৵০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড্।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
आलोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४५ शकीये पौषे, ६ष्ठ-वर्षस्य ८म-संख्या

सभापतेर्महाप्रयाणम् ।

विधातुः प्रातिकूल्याद्विदारुणोऽयमापतितो भागधेयविपर्य्यासः संस्कृतभाषाया यदितः प्रभृति परिषदियमेतस्याः सभापतिना महामहोपाध्यायपदलाञ्छनेन तत्रभवता कालीप्रसन्नभट्टाचार्य्येण चिराय विरहिता सन्तिष्ठेत । महापुरुषोऽयं वर्त्तमानसौरमासस्य प्रथमेऽहनि दुःखैकसारं भुवस्तलं परिहाय स्वगणान् स्वदेशञ्च शोकसागरे निक्षिप्य परलोकं प्रस्थितः । पूर्वत एव तदीयरोगप्रभावमवगच्छतां कालस्य करालतामनुदिनमाशङ्कमानानामपि सम्प्रति दारुणमिदं आपयतामस्माकं दीर्य्यत इव हृदयं शोकसम्भारेण । परिषदः प्रायेण प्रतिष्ठासमयादारभ्य भट्टाचार्य्यपादोऽसौ सुकौशलम् सप्त संवत्सरान्निरन्तरमस्याध्यक्ष्यं निरवर्त्तयत् । पञ्चसप्ततिवर्षदेशीयस्यापि तस्य देववाण्याः कृते तादृशः समुत्साहो नितरां विस्मयमुदपादयत् पारिषदानाम् । अपेक्षितेषु कार्य्येषु सर्व्वत्रैवायं स्वयमुपेत्य कर्म्मजातं निरवाहयत् । ईदृशस्य गुणगरीयसः साहायकमहिम्नैव अद्यत्वे परिषदियं वाञ्छितां दशां प्रतिपद्यते । नूनमयं विषमो नियतिविपाको यत्तादृशेन चिरं परिषदुन्नतिसारेण सभानायकमहत्तरेण वयमिदानीं विनाकृताः स्मः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

महात्मनोऽस्य विद्यारम्भसमयादारभ्य निखिलमेव जीवनमतिविचित्रम् । ब्राह्मणपण्डितकुलोत्पन्नोऽयं बाल्ये पण्डितोचितक्रमेण चतुष्पाठीषु व्याकरणादिशास्त्राण्यधिजगे । कोऽजानात्तदानीं यत् एष एवोत्तरकालम् आङ्गलविद्याया अपि पारङ्गतो राजकीयसंस्कृतमहापाठशालायाः सकलातिशायिनायकपदे परिकल्पितः स्यात् । प्राचीनरीत्या संस्कृतपाठादुत्तरं विश्वविद्यालयस्यान्तिमं मानपदम् एम. ए, इत्युपाधिमधिगम्य आदावयं 'हेयार' इत्याख्यविद्वत्प्रतिष्ठितपाठशालायां ततो यथाक्रमं ढाकानगरस्थितराजकीयमहाविद्यालये, 'प्रेसिडेन्सी'तिविख्यातमहाविद्यालये च अध्यापनकर्मणा विश्रुतविज्ञानप्रकर्षः अन्ततः संस्कृतमहाविद्यालयस्याध्यक्षपदवीमधिरूढवान् । ततश्च राजकीयकर्मणो विश्रान्तिमुपलभ्य सर्व्वात्मना कलिकाताविश्वविद्यालयस्याध्यापकतां स्वीचक्रे । अन्तिमे च वयसि पुनरपि राजपुरुषैर्वङ्गमण्डलान्तर्गतसंस्कृतपाठशालानां पर्य्यवेक्षकपदं आहित आस्तुर तदेव कर्म सुष्ठु समपादयत् । दृष्टश्च तत्र संस्कृतविद्यावतामसीमोन्नतिविधानप्रयत्नेन भूयानस्य प्राच्यविद्याचरमोत्कर्षनिष्पादनपक्षपातः ।

न केवलं पाण्डित्येन परं तदुचितकारुण्यसारल्यादिविविधगुणकलापेनाप्यसौ नितरामावर्जयदन्तःकरणं सहृदयानाम् । श्लाघनीयचरितानामीदृशां तिरोभावेन क्रमशैव हतभाग्यवा सम्पद्यते सुदीना संस्कृतविद्येत्यतितरां शोकस्थानमस्माकमिति किं वा ब्रूमहे ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकसभा ।

अचिरं स्वर्गतानां पाण्डित्यप्रकर्षपरिनिष्ठितान्तःकरणवृत्तीनां कलिकाता-संस्कृत-महाविद्यालयाध्यक्षचर-संस्कृत-साहित्य-परिषत् सभापतीनां महामहोपाध्यायकालीप्रसन्नभट्टाचार्य्यविद्यारत्नानां तथा ब्रह्मस्वैकनिष्ठानां वाराणसीसमाश्रितानां जयचन्द्रसिद्धान्तभूषण-महाशयानामैहिकदेहपरीहारमुपलभ्य पारिषदानामन्येषाञ्च संस्कृत-सेवकानां शोकपरीवाहार्थं विगते पौषस्य चतुर्दशदिवसे रविवासरेऽपराह्णे परिषद्भवने विदुषां महती सभा संवृत्ता । महामहोपाध्याय-श्रीयुतप्रमथनाथतर्कभूषणमहाशयोपदिष्टाध्यक्षतायां तत्र संस्कृतमहाविद्यालयाध्यक्षश्रीआशुतोषशास्त्री, सं सं श्रीपद्मनाथभट्टाचार्य्य एम, ए, (आसाम, गौहाटी) रिपणकलेजाध्यापकौ श्रीकाव्यपदविद्यारत्नः, श्रीवटुकनाथभट्टाचार्य्यः एम, ए स, हुगलीकलेजाध्यापकश्रीभागवतकुमारशास्त्रिगोस्वामी एम, ए, श्रीशितिकण्ठवाचस्पतिः (संस्कृतकलेज), विद्यासागरकलेजाध्यापकः श्रीराधारमणविद्याभूषणः, सारस्वतसमाज-सम्पादकः श्रीप्रियनाथविद्याभूषण एम, ए (ढाका), मूलाजोड़संस्कृत-विद्यालयाध्यक्षः श्रीनिम्बिकान्ततर्कतीर्थः स्काटिसचार्च कलेजाध्यापकः श्रीनन्दलालविद्याविनोदः, श्रीकाशीपतिविद्याभूषणः (भट्टपल्ली) इत्यादयो विभिन्नदेशीयाः विभिन्नसम्प्रदायस्था भूयांसो विद्वांसः सभायां समुपस्थाय इहलोकतः प्रस्थितयोः पण्डितवरयोर्गुणगणगरिमगानपुरःसरं शोकवर्षणमवर्षन् । उभये एव ते यद्यपि पूर्ववङ्गाभिजना आसन् तथापि विद्याविनयधर्म्माचारैरतीव दैशिकावच्छेदं समग्रां वङ्गभूमिमेव ते स्वसमकुर्व्वन्निति तेषामभावं सर्व्वोऽयं देशः प्रदेशनिर्व्विशेषं शोकाकुलं सममनुभवन् रोदितीति विश्वेषां विदुषामैकमत्यमभूत् । जन्मतः प्रभृति कायमनोवाग्भिरियं परिषत् यैर्महात्मभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वसुतेव प्रतिपालिता, स्वजननीव वा परिसेविता च तेषां म: म: कालीप्रसन्नभट्टाचार्य्याणां वियोगादस्या: परिषदो दिश: शून्या: प्रतिभान्तीति स्वाभाविकमेव। ऋषिकल्पानां सिद्धान्तभूषणमहाशयानामपि परिषदं प्रति सततं स्नेहदृष्टि: पदे पदेऽस्माभिरनुभूतेति म म तर्कभूषणपादानामुक्तिसंक्षेप:। उभयेषां तेषां सततस्मरणार्थं परिषद्गृहे तैलचित्रद्वयप्रतिष्ठापनाय प्रस्तावोऽभूत्, सर्व्वैरविवादं गृहीतोऽपि कुमारटुलिप्रख्यातकविराज: श्रीकालीभूषणसेनमहो[illegible] सिद्धान्तभूषणमहोदयस्य समग्रं तैलचित्रव्ययं स्वयमेव परिषदे प्रतिश्रुतवान्। सभापतीनां तैलचित्रार्थञ्च धनसंग्रहस्तदैवारब्ध:। दातॄणां नामानि यथाकालं प्रकाशयिष्यन्ते।

सभायामनेकैर्विद्वद्भिर्वाचितानां कवितानां कतिचित् अत्रैवाङ्के प्रकाशं नीयन्ते।—

संस्कृतसाहित्यपरिषद: सभापतिपादानां महामहोपाध्यायश्रीमत्कालीप्रसन्नभट्टाचार्य्यवराणां, तथा पण्डितप्रवरश्रीमज्जयचन्द्रसिद्धान्तभूषणानां स्वर्याने

शोकरुदितम्।

लेखक: श्रीराखालदासदर्शनतीर्थ:।

नित्यानन्दकरी दयार्द्रहृदया काली प्रसन्ना यतो
नित्यानन्दसुखश्रियं चिरदिनं कालीप्रसन्नो दधत्।
विद्यारत्न इति प्रियस्य विदुषां सार्थोपनामा सुधी:
सम्राजोऽपि महोच्छ्रयं द्विजवरस्त्वध्यापनाल्लब्धवान् ॥१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सच्छिक्षाविषये सतां प्रियकृतौ नित्यानुरागी गुरु-
मैत्रीं तुल्यजनान्मुदं गुरुजनान्नीचान् कृपाञ्चानयत् ।
नीचेऽपीष्टगुणाश्रये परमुदं यो नित्यमेव व्यधात्
सोऽयं कालविशेषैर्गतः कवलतां धन्या विधातुर्मतिः ॥२

आ[illegible]लतः परिषदः प्रणयन् प्रतिष्ठां
देशो[illegible]तिः क्रमविकाशमना मनस्वी ।
[illegible] गोष्पते ! पशुपते ! गुणिनश्च सभ्याः
दृष्टिं कुरुध्वमिति वाक्यपरः सदासीः ॥३

स त्वं गतोऽद्य परमां गतिमातुराणां
अस्माकमद्य परिषत् कमिहाश्रयेत ।
स्वर्गस्थितोऽपि भगवन् मघवत्सभाव
मर्त्त्येऽपि दृष्टिमनिशं कुरु युक्तचेताः ॥४

हा हा हन्त महानयं परिभवः कालेन नः साधितो
नष्टे सूर्य्य इव क्षितिर्गृहपतौ गेहं नृपे वा प्रजाः ।
जातेयं परिषन्नतेव धरणौ लुप्तेऽवलम्बे तरौ
चिन्तेयं कथमत्र शोकनिहता तादृक् श्रियं धारयेत् ॥५

अन्यच्चैतदहो तमोऽभिभवनं दुर्भाग्यतस्त्वागतं
तेजस्वी जयचन्द्र आगमदिशां सिद्धान्तभूषाप्रभः ।
काशीवासविलासतश्चिरगतं मायाकलङ्कं जहत्
अस्तं प्राप्त इतो न कालमहिमा कार्य्यं प्रतीक्षामियात् ॥६

आबाल्याद् ब्रह्मनिष्ठाकृतविमलमनाः सर्व्वविद्याप्रसादं
लब्ध्वा ख्यातिञ्च लोके त्रिदिवमधिगतो ज्ञानिलोकालयं सः ।
युक्तं तादृग्जनानामपितु महदिदं दुःखमस्मज्जनानां
देशोऽयं दीपहीनः कथमपि समयं यापयेत् किं करोतु ॥७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखकः श्रीवामाचरणकाव्यतीर्थः।

आदर्शं विद्याविनयावतारः सर्व्वप्रियः सर्व्वगुणान्वितत्वात्।
हा हा गतः सोयमितो मनस्वी कालीप्रसन्नो विदुषां वरेण्यः॥१

पाश्चात्यवैदिककुले परिलभ्य जन्म
दुःखैः पुनः पुनरहो प्रतिहन्यमानः।
श्रेष्ठत्वमाप नितरां स्वगुणैर्महात्मा
कालीप्रसन्न इह मूर्त्तिधरो विनीतिः॥२

बाल्ये व्याकरणादिशास्त्रनिवहान् तर्कं च सूक्ष्मं वरम्
ज्ञात्वाप्याङ्गलशिक्षितस्तत इतः श्रेयःप्रदं प्राप्तवान्।
ख्यातो यः स्वयमेव भारततले ज्ञानैर्विशुद्धैर्मुहुः
हा हा सोयमितश्चिराय गतवान् कालीप्रसन्नः सुधीः॥३

गाम्भीर्य्ये जलधिर्गुणे पशुपतिर्ज्ञाने तथा गीष्पतिः
स्थैर्य्ये पर्व्वतराजगर्व्वशिखरी धर्म्मे हि कुन्तीसुतः।
नीतौ शुक्र इवापरः सुरपतिर्माने गुरुः संयम
आसीद् यः परिषत्सभापतिपदे हा हा गतः क्वाधुना॥४

हा हा देव तवैव शोकजलधौ संमज्जिता विह्वला
स्कन्नेयं परिषत् त्वया विरहिता शून्यं जगद्वीक्षते।
को वा तामिह सेवते सहृदयः सर्व्वात्मना त्वं यथा
सेवाशास्ततया विधाय मतिमान् क्व प्रस्थितस्तां त्यजन्॥५

येनेयं लाघमाना बुधजनपरिषत् सर्व्वसौभाग्यभूमिः
राज्ञां विद्यावतां वा प्रतिजनसविधे कीर्त्तिता सम्यगेषा।
हन्ताद्यानन्तकीर्त्तेः सकलगुणनिधेर्दैवतस्तस्य नाशात्
वल्लीव च्छिन्नमूला प्रियतमपरिषत् शून्यशून्येव भाति॥६

संसारे निजधर्म्मकर्म्मनिचयान् संपालयन् यत्नतः
लब्ध्वा कीर्त्तिमतीव सर्व्वविषये शिक्षाप्रदानैः सदा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रख्यातैर्निजशिष्यपुत्रनिवहैः प्रज्ञावतामग्रणीः
आसीद् यो गुणवान् शशाङ्कसदृशो ग्रस्तोधुना राहुणा ॥७

द्विजवर तव कार्य्यं मीहितेयं तथापि
तव विरहजदुःखात् प्राञ्जलिः साश्रुनेत्रा ।
परि[illegible]दियसमाया शोकपुष्पाञ्जलिं ते
[illegible]जतरति सविषादं गृह्यताम् गृह्यतां सः ॥८

लेखकः श्रीकृष्णप्रसन्नतर्कवागीशः ।

यो बाल्यात् प्रतिपालयन्ननुपदं वात्सल्यपीयूषतः
वल्लीं संस्कृतसंसदं क्षतमतिर्व्याघातसम्पीड़िताम् ।
लोकानां पतति स्वतो विलसिता सत्ते हृष्टिर्यथा
धीमानेष तथा चिरं व्यरचयद् यत्नं महान्तं भुवि ॥१
गाम्भीर्य्येण महोदधिं दधदथो बुद्धौ प्रबुद्धः सदा
सौजन्यामृतसेचनाज्जनगणे क्षेमं वितन्वन् सुधीः ।
आवक्त्रैर्वक्त्रसुधाकराद्विगलितैः सन्तर्पयन् मानवान्
सम्प्राप्तो महतां पदं प्रतिपदं कालीप्रसन्नो गुणैः ॥२
पाण्डित्यं नयमण्डितं समभवद् गर्व्वं प्रचण्डं न तु
भास्यं हास्यसुधारसेन लसितं नौद्धत्यसंजृम्भितम् ।
दृष्टिः शान्तिरसप्रसिक्तविभवा क्रोधप्रदृप्ता नतु
यस्यैवं महतो गतः स सहसा शान्त्यै महेन्द्रालयम् ॥३
यः पाश्चात्यजनैः सुपूजितपदः प्राच्यैर्व्विशेषार्हितो
ज्ञात्वा संस्कृतभारतीं समभजद् यो राजभाषां पुनः ।
यं दृष्ट्वा विबुधं बुधैः स्तुतगुणं विद्यार्थिविद्योतनं
सम्राट् पाठगृहस्य नेतृपदवीमारोपयद् यत्नतः ॥४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लब्धव्यं वचनेन मे यदिजनैर्दुःखं चणाद्दुः सहं
धिङ्मां तत् परिचिन्त्य चेतसि सदा वोपीत्थमास्तुग्रतः।
कस्मैचिन्नतुदेष्कृताय सुमतिः प्रादात् कठोरं वचः
सोऽयं स्वर्नगरीं जगाम तनयान् संत्यज्यशोकार्त्तधी ॥५
यः कारुण्यसुधाम्बुधिर्दधदहो विद्याप्रकर्षं पुरः
प्रेम्णाद्येष्वपि भावमुज्ज्वलमयं मोहापहं व्यादधत्।
सान्निध्यं समिति नतोजनगणो यस्मिन् नृदेवेस्वतः
सोऽसौ सूरिवरोगतोऽमरपुरं शोकेन मुग्धं जगत् ॥६
चारित्रं ननु चिन्तितं सुललितं धात्राविचित्रं भुवि
दोषो लेशतयापि यत्रमनुजैः शक्यो न संवीक्षितुम्।
सम्राड्भक्तिनिबद्धशुद्धहृदयः प्राज्ञः प्रसन्नान्तरः
स्वर्लोकं सहसा समाश्रयदयं श्रीपूर्ववङ्गोज्ज्वलः ॥७
धीमन् संस्कृतसंसदप्यनुदिनं त्वत् स्नेहयत्नोश्चयै-
र्भूमौप्राप्तपदा पदात् पदमहोवृद्धिं गता प्रोज्ज्वलाम्।
याचित्ते भवतः सदा विलसिता कान्यवलम्बप्रसू
स्तां संत्यज्य कुतोभवान् समचलत "तातेति" सरोदिति ॥८
अस्मद्देदिकरं प्रजेषु जनुषा प्रागवङ्गभौमो भवान्
प्राक्पाश्चात्यनवीनशिक्षणविधौ दन्ताद्य उत्कर्षतः।
राज्ञः पाठगृहे महीपपुरुषैरध्यक्षतां प्रापित
उत्कृष्टां पदवीन्त्वहो समनयत् तां जन्मभूमिं गुणैः ॥९
सा भूमिर्दुःखवाष्पं विकिरति नियतं मूर्च्छिता त्वद्वियोगा
दुःखार्त्ता देशजास्ते वयमिह भवतोऽदर्शनं चिन्तयन्तः।
शोकक्लिष्टाः सुतास्ते भुवनमधिगता बोधनीयास्तु केन ?
तद्दयास्यादस्तुतद्भोः, श्रितपरमसुखो मोदतां स्वर्भवांस्तु ॥१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयचन्द्रसिद्धान्तभूषणमहाशयस्य स्वर्यानि ।

लेखकः श्रीकृष्णप्रसन्नतर्कवागीशः ।

हा हा वङ्गाद्विलसतितरां मानवानां मुखाब्जे
मालिन्यं तद् धृतनववपुः पुष्यदत्यन्तवृद्धिम् ।
म्लानो भानुर्जगदिदमहो म्लापयत्येव मन्ये
तीव्रं तेजो विकिरति यतो हन्तुमितस्य जाड्यम् ॥१
किं स्विद् वायुर्नचलतितरां फुल्लमूर्त्तिः पुरेव
नो वा दीप्तो विमलकिरणो दृश्यते नः सुधांशुः ।
आशाः शून्या जनगणमनो भीषयन्त्येव मूर्च्छा
मन्ये नूनं समभवदहो मर्म्मभित् कोऽपि हेतुः ॥२
किं भो नस्त्वं कथयसि शनैर्श्चेतसां भेदनं यत्
प्राप्तो मुक्तिं महितचरितो वङ्गसन्तानमुख्यः ।
मान्यो धीरैर्द्विजकुलमहारत्नभूतो मनीषी
विप्रो धर्म्मं प्रतिपदमसौ पालयन् यः सदासीत् ॥३
वङ्गे पूर्व्वे मधुरललिते शुद्धविप्रान्वये यो
विद्वान् जातो विभवविपुले शान्तिसन्तानरम्ये ।
आबाल्याद् यो विधिवदतुलां धारयन् प्राच्यशैलीं
धर्म्माचारानपि शुभमतिर्मोचमायात् स काश्याम् ॥४
योऽसौ धर्म्मे निहितहृदयः शुद्धबुद्धिः सदैव
नो वा धत्ते कथमपि मनस्तद्विरुद्धेऽध्वजाते ।
दृष्ट्वा विप्रं व्यपगतशिखं त्वां शकेशाग्रमौलिं
दीप्ताग्निः सन्नदहदिह तं भीषणैर्वाङ्मयूखैः ॥५
निर्ज्जीवानां विगलितमसौ वीक्ष्य धर्म्माग्रहं तं
धर्म्मान्मेषं जनयितुमहो निर्म्ममे ग्रन्थजातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येनैवास्माज्ज्ञानगणमनोमोहशोकाम्बुपूर्णात्
संसाराब्धेः सुखमनुपदं त्यक्तुमर्हत्यवश्यम् ॥६
यः शास्त्रज्ञो विदितनृपथो धर्म्मरक्षाप्रलीनो
लीनानां तत् रुचिररुचिरे नव्यशिक्षाप्रभावे ।
चेतो यत्नात् पुनरपि सतां वर्त्मनि प्राक्तनेऽस्मात्
आसक्तं स्यादिति कृतमतिः सर्व्वथाचेष्टते[illegible]
शास्त्रज्ञानं व्यकिरदपि यः शिष्यवृन्दाय नित्य
साचारं तं मनुजमनवत् यत्नतः पालयन् यः ।
चारित्रात् यो ह्यनुगतजनं प्रापयन् श्रेष्ठभूमिं
आचार्य्योऽसौ जयति जयचन्द्रो हि पुण्यप्रभावः ॥८
काले काले प्रसरति यथा शास्त्रतो लब्धबोधं
विद्वज्जातं नयति च पुनर्दृश्यमुत्कर्षमेतम् ।
ब्राह्मण्यं नो विभवविपुलं जातिसम्मानमूलम्
वर्द्धेतेति स्वगतविभवं पैतृकं यः ससर्ज्ज ॥९
जातौ जातौ जठरविवरे यन्त्रणासन्ततीस्ताः
स्मारं स्मारं विजितकरणो लब्धभोगापरक्तिः ।
धीमान् सैवं पदमधिगतो कर्त्तुकामः स्वगेहात्
प्राप्तो यत्नात् सुमतिसहितामेष वाराणसीं ताम् ॥१०
सोऽयं विहाय विकलं सहसा शरीरं संसारबन्धनगुणात् परिलब्धमुक्तिः ।
वाराणसीपुरपतेरभेदं प्रलिप्सुः जातः प्रकाममधुना सफलप्रयासः ॥११

स्वर्यातं पतिं प्रति परिषत् ।

लेखकः श्री.........

दयित क्व नु सङ्गतो भवान् करुणाहीनमना विहाय माम् ।
अपि दोषविशेषमाचरं तव पादाम्बुजयोरहं रहः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिमिरोत्करकीर्णमम्बरं विषधूमाकुलितः समीरणः।
जगदद्य वत त्वया विना सकलं शून्यमिवावभासते॥
कमुपैमि वियोगदुर्गता शमयिष्यन्त मघानि चेतसः।
गुणसंस्मरणात् पदे पदे तव सीदामि न शान्तिरस्ति मे॥
विनयन्तव शोकचेतसां विनयं कञ्चन सञ्चितं व्यधात्।
मधुरा भवतः सरस्वती स्मरणाददा शुचे प्रकल्पते॥
अयि लोकबान्धव श्रयन् कति कष्टानि मदर्थमस्वरा।
गतवानपुनर्निवृत्तये सहसा लोकदृशामगोचरे॥
शरदः किल सप्त मासिमाम् परितो गौरवगौरतां गताम्।
अक्षयाः कतिधा प्रयत्नतः सहसा किन्नु, क्षयां विमुञ्चसि॥
प्रणयान्मम शैशवावधि प्रणयन् कामपि साम्यपद्धतिम्।
जगतां सविधे प्रसिद्धये मम किं वा न भवान् समाचरत्॥
त्वदनुग्रहगौरवादहं सुचिरं लब्धवती कृपार्चनाम्।
अवशिष्टमतोऽपि यत् प्रियं तदकृत्वा किमहो विरम्यते॥
परिलोकय ते वियोगतः स्वजनाः शोकविकारसागरे।
कथमेव गता निमग्नतां न विजानन्ति विधेयमात्मनः॥
गुरुकृत्यविचारणक्षमे भविता कोनु चिरं सहायकः।
उपदेशविशेषदानतः कतमस्त्वत्सदृशो विजेष्यति॥
इह भारतवर्षमन्दिरे मम शोकः सुतरां त्वरायते।
सकलैव हि धीरमण्डली तव विच्छेदशुचा निपीड्यते॥
कतिदूरमधारि चारुणा चरणाभ्यां नियतिप्रशासनात्।
करुणामिह ते पुरातनीं तनितुं येन पराङ्मुखी मतिः॥
अथवा परलोकमाप्तवान् मम दौर्भाग्यनिदेशतो भवान्।
न ततः पुनरेति मानवः स्वजनान् सान्त्वयितुं यथायथम्॥
ज्वलतीव विषादवह्निना हृदयं धैर्यमितो विलुप्यते।
चरणादपयाति मेदिनी पतितेवास्मि पतिप्रेमाथिनी॥

0 80569

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरमस्मि तवानुकम्पया महतामन्तरतुष्टियष्टिका।
कथमद्य विहाय दुर्व्विधामपकर्षं नयसि प्रकर्षभाक् ॥
अथवा नियतिरयं क्रमः सुखदुःखे स्थिरतां न गच्छतः।
न यथाहमतः परं परं परितप्ये प्रविधीयतां तथा ॥
गतवानसि देवरूपता मभिरूपो महितां गतिं सताम्।
कुरु मां चिरमाशिषां स्रजा शुभसम्पातविलुप्तवेदनाम् ॥
तव दुःखितशिष्यमण्डली हृदयं सिञ्चति लोचनाम्भसा।
उपसृत्य कुरुष्व तामिमां स्थिरचित्तां करुणार्द्रमानसः ॥
सुपथे परिचालय प्रियां सुचिरं मां सुरमन्दिरासनः।
तव कोमलमानसान्तरात् न हि निर्व्वासय दैन्यदुर्व्विधाम् ॥

लेखकः श्रीअनन्तकुमारकाव्यव्याकरणतीर्थविद्यारत्नः।

भ्रमो न स्वप्नो वा भवति पुनरेष प्रलयकृद्
उदन्तश्चन्द्रो यद् विरहितकलङ्कः चयमितः।
कृपाशीला कालीदुरितदलनी यत्र नृवरे
प्रसन्ना सोऽप्येतान् परिहरति भूलोकनिलयान् ॥
सुविप्राणामार्य्यः परिषदनुरागी कृतिपटुः
प्रियः सामादीनां जगदुपकृतौ पूतचरितः।
चलत्येष त्यक्त्वा विदग्धशरणं बान्धवगणान्
अहो कालस्यैतज्जगदघहशः क्रूरलसितम् ॥
सुधां रत्नं लक्ष्मीं शिशिरकिरणं कल्पलतिकां
दधावब्धिः पूर्व्वं दिवि निवसतां भव्यविधये।
तथा वाचं विद्यां श्रियमुपकृतिं दानसुकृतिं
दधज्जातोऽस्यब्धिस्तव गुणगणान् स्तौमि किमहम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मणिर्वङ्गीयानां दधदतितरां दीप्तिममलां
वसन्नेकत्रासावुजिरपुरतोऽदीपयदिदम् ।
दिवं प्राप्तः कुर्यान्निजकरुणया सामरगण
स्तथैवाशीर्वादैः परिषदमिदासुन्नतिमतीम् ॥

महाभाग !

त्वया लब्धा पूर्वं परिषदियमाप्ता गुणिगणान्
तवैव प्रामाण्यात् कति कति गताः पोषकपदम् ।
ततो जीवत्काले परिषदमिमां यादृशदृशा
व्यलोकिष्ठा स्तद्वत् सकरुणमवेक्षस्व सुचिरम् ॥

जयचन्द्रसिद्धान्तभूषणमहाशयस्य स्वर्याने

लेखकः श्री.........

आजीवनं विमलपुण्यविधानदक्षः पक्षाश्रितः सुकृतिनां बुधवद्धसख्यः ।
हा हन्त सम्प्रीति गतो जयचन्द्रनामा विद्वद्वरः सुरपुरं सुगृहीतधामा ॥
संगृह्य भारतमहोदधिरत्नजालं सूचीनिबद्धमुपदीकृतवान् विशालम् ।
तस्यादा भास्वररुचा परितः प्रदीप्तं दृष्टोपकारमिव भारतवर्षमाप्तम् ॥
वाराणसीपुरपतौ चिरमेव रागात् दूरे विहाय निजदेशमपादि काशीम् ।
तत्रापि नैष्ठिकतया गुरुतत्त्वचिन्तां पाल्योचकार मनसो जयचन्द्रधीरः ॥
तद्विप्रयोगविधुरा विकलेव काशी वाणीकराद् विगलितेव विमुग्धवीणा ।
हर्षन्तु केवलमहोमणिकर्णिकाया यद्दूरवर्त्तिनममुं लभतेऽङ्कमध्ये ॥
धर्म्मप्रभावपरिमार्ज्जितचित्तवृत्तेर्यस्य प्रकाशमगमत् किल सत्यनिष्ठा ।
नित्याग्निरेण हुतभुक् परितोषमाप्तः स्वं तेजसामिव चयं व्यतरत् कृपालुः ॥
यः पण्डितोचितगुणैर्गुरुतामुपेतः
शिष्यानिवाखिलजनानकरोन्महात्मा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्कीर्त्तिसञ्चयविकस्वरचान्द्रिकाभिः
शुभ्रायितं जगदिदं त्रिदिवं स यातः ॥
वाक्येषु यस्य मृदुतान्यविलक्षणासीत्
दोजश्च वैरिमतसार्थनिरासदक्षम् ।
युक्तिस्तथा निजमतानुगुणा गुणाढ्या
हा हन्त सोऽयमवनेस्त्रिदिवं प्रतस्थे ॥

अद्यापि यस्य कविता रसरम्यभङ्गीं गीर्व्वाणभाणपरिषत् स्मरति प्रकामम् ।
शब्दे रसे स्मृतिपदे श्रुतिसारशास्त्रे तर्कादिकेषु च समं विललास वाणी ॥

स्वाभाविकी मधुरता प्रथिता यदीया
चित्तं जहार तदुपान्तविहारमालम् ।
दैवी निदेश इव सोऽयमभूद्धरायां
धर्म्मस्थितिं घटयितुं जनतोपकारी ॥
नानाविधेन विधिना विदधत् प्रधानः
धर्म्मोपकारमभिकीर्णयशः प्रतानः ।
जीर्णां तनुं परिहरन्निह भूतभूतां
भूताधिनाथवपुरेव निजं प्रचक्रे ॥

नातः परं तदुपदेशकथासुधाभिः श्रोत्रं गमिष्यति मधुष्वपि दोषदर्शम् ।
तच्चारुपूतचरितं परिपश्यतां नः प्राचीनमार्य्यचरितं परितो विभातम् ॥
एवं क्रमेण विदुषामपवर्गसर्गे जाता वयं तदुपदेशकथादरिद्राः ।
सन्मार्गमाश्रयितुमित्थमपारयन्तः कां हन्त सम्प्रति दशामुपयाम भूमौ ॥

हे चन्द्र चन्दय चिरं तव पादलग्नान्
मग्नान् भवद्विरहवारि विकारनिघ्नान् ।
त्वत्पादपद्मरजसा परिपूतमार्गे
चेतांसि चारय चिराय कृपाविशेषात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रसामञ्जस्यम् ।

लेखकः महामहोपाध्यायश्रीकैलासचन्द्रकाव्यव्याकरणसांख्यपुराणतीर्थभट्टाचार्य्यः ।

ऋषिभ्य एव प्रणतोऽस्मि तेभ्यो भूतादिसूक्ष्मादिसमस्तदृग्भ्यः ।
ध्रुवाणि पूतानि जयन्ति येषां वाक्याणि वेदार्थविकाशनानि ॥

साङ्ख्ययोगपाशुपतादिदर्शनसार्थक्यमिति हि निखिलभारतवर्षीय-संस्कृतसाहित्यसम्मेलनीसभायाः समस्माधिवेशनाय स्वागतकारिण्याः समितेः प्रश्नावतारः । तत्र "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते" इति सार्व्वजनीनप्रसिद्धेरानर्थक्यं वेति शङ्काया अपि नास्त्यवकाशः । केवलं कुत्र कीदृक् सार्थक्यमित्येतदेवालोचनीयमुपतिष्ठते ।

किन्तु प्रश्नोऽयमादिपदोपादानान्न साङ्ख्यादित्रितयमात्रविषयकः तत्तद्विशिष्टनितयोपादानाच्च न सर्व्वदर्शनविषयकः, तथाच कियद्भ्यो दर्शनेभ्यः प्रश्नस्य व्यावृत्तिरपि वर्त्तत इति प्रतीयते न पुनरप्रवृत्त-प्रश्नकानि तानि कानीति निर्णेतुं शक्यन्ते । तस्मादनिच्छतापि मया सर्वेषामेव दर्शनानां सार्थक्यं प्रदर्श्यते ।

प्रथमतस्तावत् पुरुषार्थो दृश्यतेऽनेनेति व्युत्पत्त्यैव पुरुषार्थज्ञान-साधनतया सार्थक्यं सामान्यतः प्रतीयते दर्शनानाम् । ततः पुरुषार्थ-प्रभेदानुगतविभागपर्य्यालोचनया तेषां विशेषतोऽपि सार्थकत्वं निर्णीयत एव । तथाहि

पुत्रपशुस्त्रीपरिच्छदहिरण्यान्नादयः प्रसिद्धा अपि भुवनेष्वियन्त इति संख्यातुमशक्याः पुरुषार्थाः प्रीत्यर्थकत्वाद् गौणतरास्तथाच "तत्-सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचार" इति न्यायसूत्रम् । स पुनः प्रीत्यात्मकः पुरुषार्थो गौण एव दुःखनिवृत्त्यर्थकत्वादतो दुःखनिवृत्ति-रित्येक एव पुरुषार्थो मुख्यतयावतिष्ठते । कथं सुखिभिरप्यन्विष्य-मानस्य सुखस्य दुःखनिवृत्त्यर्थकत्वमिति चेदुच्यते । क्षणिके एव हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखदुःखे, व्यतिविरुद्धे च। तस्मात् सुखसमकालं दुःखं न सम्भवतीति ध्रुवं, किन्तु सुखीति परैः प्रतीयमानो विद्यमानसुखसाधनकोऽपि जनः प्रबलेन दुःखविशेषेणाभिहन्यते तन्निरोधार्थमेव सुखसाधनान्तरमपेक्ष्यते। यथा गृहाङ्गना यद्यपि चारुरूपा तथापि पुंसां परदारवार्त्तेति प्रायिकीयं संस्कारदुःखोद्धे जना। तथा

निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेश्वरत्वं पुनः।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्रह्मास्पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिर्हरपदं काशावधिं के गताः॥ इति

च परिणामदुःखताड़ना। द्विविधेऽस्मिन् दुःखविकल्पे सुखाभिमानः स्फुरति संसारिणामतः स्वयमपि ते नानुशोचन्ति किमिदमापतितमिति। तथापि तापत्रयस्येव तद्धितयस्यापि निवारणार्थमेवेहन्ते। कथमन्यथा सत्येव बुभुक्षादावशनादिकमुपयुज्यते, तत्रासति पुनरमृतादिकमपि न रोचत इति तस्मात् सुखस्य दुःखनिवृत्त्यर्थकत्वं सुस्थितम्। एवञ्च सर्वेषामेव प्रयोजनीभूतानां दुःखनिवृत्त्यङ्गत्वे दुःखनिवृत्तेश्च प्रयोजनान्तरनिरपेक्षतया मूलपुरुषार्थत्वे निर्णीते तादृशस्ये तरस्याभावात्तस्यैकविधत्वमपि मन्तव्यं; तथाच सुखलाभाभावादपुरुषार्थत्वमिति चेन्न पुरुषार्थद्वैविध्यादिति साङ्ख्यसूत्रमर्थात् दुःखात्यन्तनिवृत्तिरूपे मोक्षे सुखदुःखोभयबीजसमुच्छित्त्या साधिते सुखस्याप्रसङ्गात् पुरुषार्थता नास्तीति चेदुच्यते तदा पुरुषार्थद्वैविध्यमापतति, तद्धि न सम्भवति, सुखस्यापि प्रदर्शितादुःखनिवृत्त्यर्थत्वात् समुत्तीर्णसरिता नौरिव प्राप्तमोक्षेण सुखमपि निरर्थकतया नापेक्ष्यत एवेति पुरुषार्थस्यैकविधत्वमपि सुस्थितम्। तथाविधस्यापि पुरुषार्थस्य दुःखानां दुःखहेतूनां तत्तन्निवृत्तिसाधनानाञ्च नानाविधत्वादुत्कर्षापकर्षतारतम्येन बहुधा भेदो द्रष्टव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संक्षेपतस्तावद्दुःखं त्रिविधमिति प्रागेवोक्तं। तत्र लोकप्रसिद्धमपि तापाख्यं दुःखं स्थानभेदादष्टादशधा बोद्धव्यं। बुद्धहङ्कारमनः-श्रोत्रत्वगक्षिरसनाघ्राणवाक् पाणिपादपायूपस्थ-नामक-त्रयोदशकरणानां याः प्रातिस्विकवृत्तयस्त्रयोदश याश्च सामान्यवृत्तयः प्राणाद्याः पञ्चैव, तासां यथा कथञ्चिद् बाधनैव ताप इत्याख्यायते। जन्मक्षणे मृत्युक्षणे च सर्वेषामेव तापानामुपस्थितिर्व्याधिप्रहारादिषु चान्यतमानां केषाञ्चिदनियतसंख्यकानामित्येतत् सर्वं सुगमम्। निमित्तभेदादाधि-भौतिकाधिदैविकाध्यात्मिकसंज्ञाभिस्तापस्यैव त्रैविध्यमपि प्रसिद्धं, तद्विवरणेनालम्। संस्कारदुःखं सुखस्मृतिप्रधानम्; परिमाणदुःखञ्च सुखसङ्कल्पप्रधानं; तयोः सुखविषयकतयैव सुखेष्वन्तर्भावः क्रियते मूढात्मभिः।

वस्तुतस्तु रुचिलालसात्मकाभ्यां ताभ्यामपि राजसाभ्यां सत्त्वस्य बाध्यमानत्वात् तयोरपि तापस्येव "बाधनालक्षणं दुःख"मिति न्याय-सूत्रीयदुःखलक्षणेनावबोधः सम्यगुपलभ्यते। कथमन्यथा सुखाभि-मानिनोऽपि तयोरुपशमाय समीहन्ते, तस्मात् सर्वेभ्य एव तेभ्यो भृशं बिभेति विवेकी। तथाच "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिन" इति योगसूत्रीयव्यासभाष्ये दुःखव्याख्यानात् परत "एवमिदमनादि दुःखस्रोतो विप्रसृतं योगिनमेव प्रतिकूला-त्मकत्वादुद्वेजयति, कस्मादक्षिपात्रकल्पो हि विद्वा"निति यथोर्णातन्तु-रक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु, एवमेतानि दुःखानि अक्षिपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरं प्रतिपत्तारम्। इतरन्तु स्वकर्मोपहृतं दुःखमुपात्तमुपात्तं त्यजन्तं त्यक्तं त्यक्तमुपाददान-मनादिवासनाविचित्रया चित्तवृत्त्या समन्ततोऽनुविद्धमिव अविद्यया हातव्य एवाहङ्कारममकारानुपातिनं जातं जातं बाह्याध्यात्मिकोभय-निमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते इति सर्वं सुविवृतमेव। दुःखानां निवृत्तिसाधनानीदानीं कथनीयानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषु कानिचिद्वैदिकानि कानिचिदामुष्मिकानि कानिचिदलौकिकानि च। तत्र केषाञ्चित् साक्षाद्दुःखनिवर्त्तकत्वं केषाञ्चित् सुखोपढौकनद्वारा केषाञ्चिद्दीर्घपरम्परयापीति यथायथमनुसन्धेयम् ऐहिकानां मध्ये साक्षाद्दुःखनिवर्त्तकमौषधादि प्रायशो दुःसेवतया सहसा न स्वीक्रियते जनैः। स्रक्चन्दनवधूवस्त्रादि तु विविधसुखसम्पादनद्वारा दुःखं निवारयतीति तत्रैवासक्तिर्निरूढ़ा जनानाम्। केचित् किञ्चिज्ज्ञा आत्मनो लोकान्तरसम्बन्धमनुमोदमानैर्यागाद्यनुष्ठानेन पुण्यं सञ्चीयते च तदिदमैहिकानुष्ठानजन्यमामुष्मिकं पुण्यं स्वर्गीयसुखनिष्पादनद्वारा दुःखप्रतिरोधकमिति साधनपारम्पर्य्यदीर्घत्वस्य दिङ्मात्रमुदाहरणम्। वैदेह्यप्रकृतिलयत्वनिःश्रेयसानि पुनरलौकिकानि साक्षाद् दुःखनिवर्त्तकानि। किन्तु तेषु सुखलेशस्याप्यसम्भवादनधिकारः सुखैषिणाम्। अमी हि सुखकणरत्नलोभान्वितधियः सततं सकलदुःखसागरेषु निमज्जन्तः पुनः पुनर्जन्मजरामरणरोगशोकादिभिरत्तुङ्गतरङ्गैरभिहन्यमाना अपि यादांसीव ततो न विरज्यन्ति। दुःखभीतस्तु सुधीरः प्रदीप्तगृहाग्नौ सिकतामुष्टिप्रक्षेपस्येव नैसर्गिकदुःखमये संसारे विषयसुखोपयोगस्य नैष्फल्यमुपलभ्य विरमति। तथाचोक्तं शान्तिशतके

रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गीतादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये।
किन्तु प्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः॥ इति

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामा लभन्ते॥

इति श्रीमद्भगवद्गीतावाक्याच्च।

"समानं जरामरणादिजं दुःख"मिति साङ्ख्यसूत्राच्च। स्वर्गीयमुच्चावचंसुखमपि दुःखभीतमाश्वासयितुं नालम्। स्वर्गिणां हि परमस्मदपेक्षया सुदीर्घतरायुष्कत्वमितोयानेव विशेषः। तस्मात्तदपि विषसम्पृक्तान्न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिव समुपेक्षते साधुः। "कुत्रापि कोऽपि सुखी न" "तदपि दुःख-शबलमिति दुःखपक्षे निक्षिपन्ते विवेचकाः" इति साङ्ख्यसूत्राभ्यां सुखस्य सर्वस्यैवानित्यत्वं दुःखस्येव हेयत्वञ्च समाख्यातम्। वैदेह्ये प्रकृतिलयत्वे च तापपरिणामाभ्यां परिहीणेऽपि संस्कारसद्भावाद्दुःखनिवृत्तेर्नैकान्तिकत्वं तस्य तया पुनरावृत्त्यवश्यम्भावाच्च नात्यन्तिकत्वमिति। तथाच "भवप्रत्ययो विदेहप्रकृतिलयाना"मिति योगसूत्रीयव्यासभाष्ये विदेहानां देवानां भवप्रत्ययस्तेहि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति। तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति, यावन्न पुनरावर्त्ततेऽधिकारवशाच्चित्तमिति सुव्यक्तम्।

इत्थं विषयेषु दोषदर्शनादुपतिष्ठते वैराग्यं दुःखभीरोः। तथाच "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्य"मिति योगसूत्रम्। स्त्रियोऽन्नपानमैश्वर्यमिति दृष्टविषयवितृष्णस्य स्वर्गवैदेह्यप्रकृतिलयत्वप्राप्ता वानुश्रविकविषयवितृष्णस्य दिव्यादिव्यविषयसंप्रयोगेऽपि चित्तस्य विषयदोषदर्शिनः प्रसंख्यानबलादनाभोगात्मिका हेयोपादेयशून्या वशीकारसंज्ञा वैराग्यमिति तद्भाष्यञ्च।

लब्धवैराग्यस्यापि जन्ममृत्युपरम्परापरिपीड़ितस्य महती व्याकुलता प्रवर्त्तते। सैषावस्थापि

यश्च कामपरो लोके यश्च बुद्धेः परं गतः।
उभौ तौ सुखमेधेते क्लिश्यत्यन्तरितो जनः॥

इत्येवं महाभारतादावुक्ता। तदवस्थेन तेन यत् क्रियते तदेव दुःखसूत्रीयभाष्ये प्रोक्तं यथा—

"तदेवमनादिदुःखस्रोतसा व्यूह्यमानमात्मानं भूतग्रामञ्च दृष्ट्वा योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रपद्यत" इति।

प्रागुक्तालौकिकान्तिमदुःखनिवृत्तिसाधनं निःश्रेयसमस्मादेवावोत्तात् सम्यग्दर्शनान्निष्पद्यत इत्यस्यैवोपायश्चिन्तनीयः सम्यग्दर्शनं हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समीचीनं ज्ञानं तत् केनोपायेनासादनीयमिति निर्विन्नस्य प्रश्ने विपुलविद्वत्परिषदि समुपस्थापिते नैकोऽपि तूष्णीं स्थास्यति। तं निर्विन्नं पुरुषं प्रति चार्वाकदर्शनविदो वक्ष्यन्ति

"अहो, मुधा भ्रान्तोऽसि, अनृतव्याघातपुनरुक्तदोषजटिलैर्वेदादिवाक्यैः। हन्त देहोच्छेद एव मोक्षः स तु स्वभावादेवागमिष्यति। नातः परन्ते किञ्चिदपि स्थेयात् तस्मादङ्गनालिङ्गनादिजन्यं सुखं परिहरता नात्मवञ्चना कार्य्या। किं बहुनोक्तेन

त्याज्यं सुखं विषयसङ्गमजन्म पुंसां
दुःखोपसृष्टमिति मूर्खविचारणैषा।
को नाम भोस्तुषकणोपहितान् हितार्थी
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्॥

सुतरां एतावदेव सम्यग्दर्शनं गृहाणेति।

बौद्धदर्शनानुरागिणो वक्ष्यन्ति "क्षणभङ्गुरेऽस्मिन् जगति योगाचारावस्मद्दर्शनोक्ताववलम्ब्य, दुःखमायतनं समुदायो मार्गश्चेति चत्वारि तत्त्वानि पर्य्यालोच्य भगवान् सुगतो देव उपास्यतां ततस्ते स्वयंप्रकाशा बुद्धिः शान्तिं लप्स्यते यद्यपि चतुःप्रस्थानिका वयं तथापि रागादिज्ञानसन्तानवासनोच्छेदजन्यैव मुक्तिः सर्ववादिसम्मतेति।

जैनदर्शनविदो वक्ष्यन्ति—क्षित्यादि सकर्त्तृकं वदित्यनुमानेन यः सर्व्ववित्, सर्व्वकर्त्ता निर्णीयते स एव परमेश्वर उपास्यतां, ततस्ते जीवाजीवास्रवबन्धसंवरमोक्षेषु समस्तु तत्त्वेषु श्रद्धानं यदुदेष्यति तदेव सम्यग्दर्शनं ज्ञानचारित्राभ्यां मोक्षमार्गस्त्वया गन्तव्य इति।

नकुलीशपाशुपतदर्शनशैवदर्शनप्रत्यभिज्ञादर्शनरसेश्वरदर्शनविदो यथास्वकर्म्मपद्धतिसहितया महेश्वरोपासनया पूर्णप्रज्ञादिदर्शनविदश्च तथा विष्णूपासनया मुपदेक्ष्यन्ति।

अर्थार्षदर्शनैकदर्शिनामपि मीमांसकप्रवराः फलसन्धानरहितैः कर्म्मभिरेव परमपुरुषार्थः सम्पद्यत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैयायिकब्रुवाः प्रमाणादि-निग्रहस्थानान्त-षोड़शपदार्थयाथार्थ्यज्ञानादेव निःश्रेयसं प्राप्यत इति।

वैशेषिकम्मन्यानिनो द्रव्यगुणकर्मादिषट्पदार्थतत्त्वज्ञानादेव निःश्रेयसं स्यादिति।

साङ्ख्यम्मन्याः प्रकृत्यादिपञ्चविंशतितत्त्वानां ज्ञानादेव मुक्तिर्निष्पद्यत इति।

योगविन्मानिनश्चासम्प्रज्ञातसमाधिनैवाविद्यानाशात् कैवल्यमिति वर्णयन्ति।

षड्शास्त्रकृतो व्यासस्य ब्रह्ममीमांसायामपि शङ्कररामानुजादिप्रवर्त्तितविविधबहुसम्प्रदायाः शास्त्रान्तरनिरपेक्षादद्वैतभावनामात्रान्मुक्तिमाघोषयन्ति। हन्तेदानीं किं करोतु निर्विण्णस्तपस्वी ?

(क्रमशः)

चन्द्रालोकः

लेखकः—श्रीधूर्जटिप्रसादकाव्यतीर्थः

सप्तमोऽङ्कः—समरभूमिप्रान्तरम्

चूलिका

(नेपथ्ये) हा धिक्, कष्टम्

संहर्त्तापि कपालहृग्धुतभुजा विश्वस्य मृत्युञ्जयः
सानीकाः सुरसत्तमा दिगधिपा अन्ये च धात्रादयः।
यच्छस्त्रौघहतौजसः प्रहरणव्यासङ्गशोणोक्षिताः
स्थानं निर्जनमाश्रयन्ति नितरां लज्जावनम्राननाः॥

ततः प्रविशति सह सारथिना श्रीकृष्णः

श्रीकृष्णः—(प्रविश्य) यद्येवं, सिद्धप्रायो मे मनोरथः। (विमृश्य) तत् किमन्यदधुनावशिष्यते (स्मृत्वा) आं स्मृतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयस्तानमरानमोघपथानेतान्नयामो रणे
पश्यामस्तदमाननापरिगतक्रौञ्जानदीनं मुखम्।
तत्पश्चादपि मे प्रसादवशतः सन्दर्शयन्तः पुरो-
दृष्ट्वा पार्थयशः सुतामिह ततः श्यापाहिसुच्यामहे॥

सूतः—आयुष्मन्! कोऽयमत्र त्वरितपदो व्याकुल इवाभिवर्त्तते?

कृष्णः—(दृष्ट्वा) अये! मन्दप्रतापोऽयं देवसेनापतिः कार्त्तिकेयः पाण्डव-सिन्धुतरङ्गविक्षिप्त इव रुद्धश्वासः।

कार्त्तिकेयः—(प्रविश्यैव) अहह! किमयं लज्जाकरः परिणामो मादृशानाम्

योऽहं प्रागवहेलया त्रिभुवनप्रोत्सर्दकं तारकं
देवानां पुरतो निहत्य विदितो देवाग्रसेनापतिः।
माता दैत्यनिसूदनी भगवती तातः स मृत्युञ्जयः
सोऽप्याहं विजितो नरैरिति वरं मृत्योः सुखालिङ्गनम्॥

(विचिन्त्य) अथवा; सर्व्व एव देवाः परैः पराजिता भवन्ति तत् किमस्मद्बुद्धिवैकल्येन? (दृष्ट्वा) अहह! इत एव कदली-वनमिव दन्तावलयूथपतिर्मानवसेनापतिर्धनञ्जयो मानवबल-मुन्मथ्याभिवर्त्तते नाम? तदस्मिन्नेव स्थाने लतागुल्मान्तरित-स्तिष्ठामि (तथास्थितः पुनः पुरतो निरूप्य) आगच्छन्नेव स कथं नाम प्रतिनिवर्त्तते? हन्त हन्त! पश्चाद्देवसेनाभिराक्रान्तः पुनस्तदभिमुखं धावितः (सोत्साहम्) तदलं कालविलम्बेन? अहमप्युनैवैनमनुसरामि।

सूतः—आयुष्मन्! क इमे प्रबलतरमाक्रान्ताः फूत्कुर्व्वन्त इत एव प्रसरन्ति?

कृष्णः—कष्टमेतद्दशाविपर्य्ययेण सत्यमतिव्याकुलोऽस्मि; कथं? महादेव-पुरःसरा देवा भीष्मादिभिरनुद्रुताः पलायन्ते नाम?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः प्रविशति महादेवः

धिक् शस्त्रं धिग् बलं दैवं धिक् तेजो जीवितञ्च धिक् ।
निर्ज्जिता निर्जराः कष्टममरा मरधर्म्मिभिः ॥

(दृष्ट्वा) अये ! अयं हि स मायामयः परमकापटिको भगवान् समरेऽस्मत्पराजयं सानन्दं प्रेक्षते नाम (अग्रे गत्वा) विजयतां शत्रुपक्षपातो मायामयो द्वारकाधिपतिः ।

कृष्णः—शूलपाणे ! भवत्पराजयात् किन्नाम ममापि निन्दामलीमसं न भवति यशः ?

महा—भगवन् !

जन्ममृत्युर्यशो निन्दा सुखं दुःखं सुधा विषम् ।
समतां भजते यस्मिन् तत्र वाचा फलं नु किम् ॥

तत् पृच्छामि, कच्चिदुर्व्वशीशापचयं प्रधानीकृत्य देवानां गर्व्वोत्सादनं भक्तानां मानवानां च शक्तिप्रकर्षाविदनञ्चास्याः समरावतारणाया हेतुः ?

(नेपथ्ये) भोः ! भोः ! लोकत्रयनियन्तारो जरामरणरहिताः शक्रपुरोगमा देवाः ! मध्यमलोकसन्त्रस्ताः क नु खलु पलायन्ते ? निवर्त्तन्ताम् ; निवर्त्तन्ताम् ;—

जाता देवकुले सुधाशनपरा वज्रादिशस्त्रोद्वहा
दैत्यघ्ना अजरामरास्त्रिजगतः सर्व्वार्थकल्पद्रुमाः ।
अस्माभिर्विजिता भयाद् यदि पलायन्ते समन्तात्ततो
युक्तं नाम दिविष्ठता लघुतया येषां लघुत्वं धनम् ॥

कृष्णः—(स्वगतम्) युक्तं नाम विजेतॄणामेतेषामिदमभिहितम् (प्रकाशम्) अहह ! एवमाकर्ण्य कथं भवन्तो महावीर्य्यवत्तरा अपि तूष्णीमासते ? त्वर्य्यतां त्वर्य्यताम् मानवबलक्षयाय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भो भो निर्जरप्रधानाः !

उद्गृह्णीत निजां शक्तिं धत्त चित्ते महत्तमः।
देवाः धावत युध्यध्वं क्रोधाध्माता रणाङ्गने ॥

महादेवः—अरे रे प्रबलबलाभिमानदृप्ताः !

तावद्गर्ज्जत फेरुकुक्कुरसमाः संवर्द्ध्य कर्णज्वरं
तावत् तिष्ठत मारुताहतशिखा दीपा इवायोधने।
यावद्बालतताप्रमाथि गजवद् युष्मच्छिरः कोमलम्
भिन्देरन्न च मादृशामिह रणे शूलादयः शक्तयः ॥

(नेपथ्ये) अपि च भो यदुबलनेतारः ! सात्यकिप्रभृतयो योधाः कथयत क्व नु खलु भवतामधिराजः स एव द्वारकाधिपतिः श्रीकृष्णो वर्त्तते ; एष खलु भारद्वाजो द्रोणाचार्य्यः समाज्ञापयति—

देवानामपि देवः सोऽप्यनाद्यन्तः परो निधिः।
युध्यस्व यदि शूरस्त्वमेषोऽस्मि समुपागतः ॥

कृष्णः—(श्रुत्वा) आर्य्य ! दारुक ! प्रणोद्यन्तां तत्र वाहाः ; तत्र वर्त्तते स खलु भरद्वाजसूनुर्भगवान् द्रोणाचार्य्यः।

दारुकः—(दृष्ट्वा) आयुष्मन् ! अलं गमनेन ; स किलात्रागच्छतीति तर्कयामि।

द्रोणाचार्य्यः। (प्रविशन्नेव पुरतो वासुदेवं दृष्ट्वा) यद्यप्ययं हि भगवान् वासुदेवः सह समरकुशलिना सारथिना प्रतिक्षणं प्रतीक्षते समराय ; तथापि कथङ्कारमनेन सह योत्स्यामहे ?

भोगेषु मोक्षेषु सुखेषु दुःखेष्वसंशयं यः शरणं त्रिलोक्याः।
कृष्णस्य तस्याद्य कथं शरीरे चण्डातिचण्डान् विशिखान् क्षिपामि

तदृस्तारय धनुःशरमनवरतलोकविनाशनक्रूरकर्माहं पादयोः पतामि (तथाकृत्वा) भगवन् ! भक्तवत्सल ! क्षम्यतां मे पापकलुषितात्मनो ब्राह्मणब्रुवस्य दोषः भवता सह युध्यमानस्य—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वधर्म्ममुल्लङ्घ्य चिराय पापिना मात्सर्य्यपूर्णेन मया कृतं हि यत्।
आत्मानमङ्घ्रितले निपातयन् तत्पापनाशाय नतोऽस्मि पाहि माम्॥

कृष्ण:—(उत्थाप्य) वीरप्रधान! कथमकालेनैवाधुना वृथा खिद्यते; उत्तिष्ठतु; भविष्यति कुरुक्षेत्रसमरे प्रायश्चित्तं गणयिष्यति भवान्।

द्रोण:—(उत्थाय) भगवन्! किमिदानीं श्रूयते पुनः कुरुक्षेत्रे युद्धमिति? तत्तस्य युद्धस्य किमेव पाण्डवविजयाभिनयस्य प्रथमाङ्कावतारः?

कृष्ण:—यन्मन्यते तत्तथैव।

द्रोण:—अतो हि किम् कौरवकुले वैरं प्रवृत्तम्?

कृष्ण:—आर्य्य! भरद्वाजसूनो! रणाङ्गने प्राकृतवन्नीत्या युद्धमपहाय कथमिदानीमनधिकारचर्चा क्रियते।

दारुक:—आर्य्य! किमेतत्—

विप्रोऽपि क्षत्रधर्म्मी सन् यद् यदर्ज्जितवान् यशः।
कथं जहाति तद्द्विज! भीत्या वानुशयेन वा॥

कृष्ण:—वातुल! अलमिदानीं वाक्प्रपञ्चेन; शस्त्रं गृहाण वा धनुष्काण्डं वा प्रविहाय वनं परिव्रज—]

उद्घोषन्तु दशदिशः कार्य्यमार्य्यैर्विगर्हितम्।
चिरावज्ञातसत्त्वस्य कृतघ्नस्यायशस्विनः॥

द्रोण:—(स्वगतम्) सत्यमित्थम्भूत एवास्मि (प्रकाशं) यद्येवम्; तदनुजानीहि मां समरावतरणाय।

कृष्ण:—युक्तमिदमिदानीं भवादृशस्य महावीरस्य; विजयताम्।

द्रोण:—(प्रणम्य) फलतु मयि सर्व्वथा भगवदाशीः　(निष्क्रान्ताः सर्व्वे)

ततः प्रविशत्यपटीक्षेपेण दुर्व्वासा नारदश्च

दुर्व्वासा:—हन्त हन्त भोः

किमियं मानवीशक्तिर्यतो ब्रह्मपुरःसराः
इतस्ततः पलायन्ते वात्याविच्छिन्नपर्णवत्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्मूलमनेनैव विरोधेन चिराय गास्यत्येव त्रिलोकी मध्यम-लोकस्य यशोगीतिकाम्।

नारदः—ऋषे! सत्यमिदम्।

दुर्व्वासाः—किन्तु मया ब्रह्मविष्णुरुद्रप्रमुखा देवा यदिह सङ्गमिताः, न जाने तेन मे पापस्पर्शो भविष्यति नवा।

नारदः—ऋषे! त्रिजगदज्ञाननिराकरणाय यस्याविर्भावः; स एव रुद्रांशावतारो भवानिति को न जानाति, अतस्ते हि भगवद्धृत-तेजसो महामायया मुग्धा न पुनर्भवता। अतः कथं पापस्पर्शो भवेद् भवादृशस्य।

दुर्व्वासाः—देवर्षे! पश्यतु पश्यतु—

भीष्मेण क्वचिदीश्वरो हलभृता भीमः क्वचिद्विष्णुना
द्रोणः, क्वापि सुयोधनेन मघवा, कामः क्वचित् सौरिणा।
स्कन्देन क्वचिदर्ज्जुनो जलपतिर्माद्रीसुतेन क्वचिद्
वायुः क्वापि युधिष्ठिरेण च विधिः शाल्वेन योयुध्यते॥

नारदः—इतोऽपि पश्यतु महाभागः,

खगाम्भोधो विदुरस्तदनुस्फटिका कालभुजगा
मयूरास्तत्पश्चादिति प्रस्रतोऽद्भुतघटना।
समाकीर्णे युद्धे सुरनरमहानादविकटे
कृता बुद्धिर्येन क्व नु परिणतिः किन्नु भविता॥

दुर्व्वासाः—देवर्षे! इतः पश्यतु वायुर्युधिष्ठिरेण पराजितः पलायते; अथार्द्धमार्गे दण्डधरो यमो युधिष्ठिरं भीषणमाक्रामति।

नारदः—अहो! विचित्रः खलु पितापुत्रयोः समरः। यथोऽतोऽपि दण्डो दण्डधरस्य वर इव निपतति पार्थशिरसि तथाच—

न च्छिन्ते शतभारेण विस्मृत्या च्यवते न च।
कल्पान्ते न क्षयं याति धन्यं वात्सल्यबन्धनम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्वासाः—देवर्षे ! इतः शिशुपालसहदेवजरासन्धघटोत्कचादयः शाम्बानिरुद्धसात्यकिप्रभृतिभिः सह युध्यन्ते। तदागच्छतु भवानन्यतः समरमहोत्सवदर्शनाय प्रतिष्ठावहे।

नारदः—ममाप्येतदभिमतम्।

उभौ निष्क्रान्तौ

ततः प्रविशति युधिष्ठिरो यमश्च

युधि—प्रेतराज !

प्रभावः प्रेतेषु स्फुटति भवतो जीविषु कथं
स दृश्यः कास्वेवं नहि विदितमस्त्यन्यतरया।
यदालोकालोकस्तरति नरकात् सोऽस्ति पुरतो
विधातुं किं शक्तो स्तवपुरवीश ! त्वमिह मे॥

यमः—धर्मसूनो !

नश्यन्तु शत्रवः सर्वा भव देवविकल्पनिन्।
मद्दण्डाघातनिष्पिंष्टसहस्रोरस्कात्तविग्रहः॥

(दण्डं धारयति)

ततः प्रविशति भीष्मो महादेवश्च

भीष्मः—त्रिपुरान्तक !

एकं सर्व्वधनुष्मतामधिपती रुद्रेश एवं भवान्
हत्वैवं त्रिपुरासुरं पुरहरः शूलास्त्र एवं हरः।
शूलञ्चोन्नयतामसिञ्च निशितं शिष्यानुशिष्योद्यताद्
वाणाद् रक्ष निजं रणेषु विजयात् कार्य्ये समर्थो यदि॥

महादेवः—भार्गवजयिन् ! अम्बास्वयंवरे विजित्य भार्गवं महामदावलेपाद् यदात्मना श्लाघसे ; तदधुना व्यलीकमेवास्तु। यतः

सहस्रार्कज्योतिर्ज्वलदनुदिशं लोकभयदं
त्रिशूलं विश्वघ्नं प्रबलबलदर्पप्रशमनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि त्वं शक्तोऽद्य प्रशमय बलात् क्षत्रियशिशो !
निवार्य्यैनं नेदं स्मर जयफलं तद् रणसुखम् ॥

(शूलं धत्ते)

ततः प्रविशति धनञ्जयः कार्त्तिकेयश्च

धन—तारकारे ! कार्त्तिकेय !

त्वया स्वः सेनान्या दनुजदलनोत्पातपवन !
प्रयुक्तं यद्दोर्य्यं क्व नु खलु गतं तद् युधि मया।
सरोषा दृष्टिर्या यदपि खरशाखप्रहरणं
तव प्रायं हास्यं जनयति विलोक्येदमधुना ॥

कार्त्ति—समरश्लाघिन् ! धनञ्जय !

ब्रह्मायं गिरिशोऽयमेष भगवान् एते च दिक्पालका
एते स्थावरजङ्गमा इह रणे ते सन्तु मे साक्षिणः।
अद्यास्त्रौघकरालवक्त्रकुहरव्यादानमध्यङ्गतं
त्वां पश्यन्तु मया निपातितमसन्मिथ्याभिमानं युधा ॥

(शक्तिमुत्तोलयति)

ततः प्रविशति दुर्य्योधनो देवराजश्च

दुर्य्यो—त्रिदिवाधिराज !

लब्ध्वा ब्राह्मणनाशनेन कुलिशं वृत्रादिशत्रूंस्तथा
जित्वा प्राप्य दिवं दिवस्पतिरथो त्रैलोक्यपूज्योऽपि यत्।
यद्वा जिष्णुरितिश्रुतस्य तपसा तत्सिद्धिरेवं विदुः
का शक्तिर्विबुधप्रमाथिनि रणे मत्तोऽवतु स्वं वपुः ॥

देव—धिङ्मूर्ख ! न मां विदितवानसि, यथा किल—

येनेष्ट्वा विधिना क्रतुं शततमं स्वाराज्यमाप्तं पुरा
यत्तृप्त्यै ज्वलने जुहोति च हविर्देवाश्च यस्यानुगाः
लोका यत्पदकाङ्क्षया विदधते कष्टं तपः सन्ततं
सोऽहं सर्व्वजनाभिनन्दितयशास्तर्केण मूर्खेण किम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मादुच्चवीर्य्यसंभिन्नसम्मा ममनभावनातिथिर्भव !

(वध्वमुक्तोलवति)

ततः प्रविशति नकुलो वरुणश्च

नकुलः—हंहो प्रचेताराज !

अधो भूमौ वाणो विचरणमधोदूषिततले-
ष्वधो दिग्राजेन्द्रोऽधमविषधरैर्गाढ़सखिता।
अधोभावे शील त्रिजगदधमस्त्वं परिचितो
न यावद्व्यापन्नो भवति रणतोऽपेहि न चिरात् ॥

वरुण—अरे क्षत्रियवाचाट !

अयं पाशः साक्षाच्छमन इव यावन्न पतति
स्फुरद्वह्निज्वालो न च तव शिरो विध्यति शरः।
यदि प्राणेष्वास्था पत तदधुना मामकपदे
नचेद् रक्षात्मानं करधृतधनुः खड्गपरशुः ॥ (पाशमादत्ते)

ततः प्रविशति शाल्वो ब्रह्मा च

शाल्वः—प्रजापते ! पितामह !

वेदस्रष्टा सरसनलिनीनालमध्यस्थितः सन्
शान्तो दान्तस्तपसि निरतो दुर्बलो नित्यसत्त्वः।
धाता वृद्धस्त्वमसि तमसां किन्तु जानासि युद्धे
क्षत्रेणेत्थं लघुभुजधृतेनाद्य किं कर्त्तुमीशः ॥

ब्रह्मा—अरे क्षत्रियाधम !

वृद्धो वा हतवीर्य्यो वा मूढ़ो वा युद्धनीतिषु।
एष क्षिपाम्यक्षमालां निवारय यदीशिषे ॥

(अक्षमालां गृह्णाति)

ततः प्रविशति द्रोणः कृष्णश्च

द्रोणः—भगवन् ! क्षुद्रमानवसमरे कथमधुना व्याकुलं इव लक्ष्यते भवान् तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घनश्वासैर्वक्षः स्फुरति वदनात् स्वेदकणिका
प्रदीप्तेयं मुक्ताफलजितरचनां संघटयति ।
श्लथीभूतौ बाहुश्वरणमवशं लक्ष्यतु मां
यदीच्छेत् संग्रामादिरमतु भवांस्तिष्ठतु रणः ॥

न खलु व्यतिभाति योद्धृणां व्याकुलेन समं युद्धव्यापारः

कृष्ण.—(स्वगतम्) भारद्वाज ! भवतोरवरक्षणायैष्यभूत एवास्मि (दृष्ट्वा) हंहो ! सर्व्व एव देवाः स्वर्गकिञ्चिप्ता वर्त्तन्ते तदिदानीं सुदर्शनोद्धरणसमय एष समुपस्थितः (प्रकाशं) विप्रवीर !

ज्वलत्तेजा वह्निः खरतरविकारो भीमपवनः
शिवो विश्वध्वंसी स खलु वरुणो वा मृतपतिः ।
मघोनो वा वज्रं यदिह न विधातुं प्रभवति
तदेतच्चक्रं त्वां दहतु निखिलञ्च प्रशमय ॥

(इति चक्रमादत्ते)

द्रोण —(अस्त्रं विहाय कृताञ्जलिस्तिष्ठति)

(नेपथ्ये) संहर संहर क्रोधं रक्ष रक्ष जगत्त्रयम् ।
शङ्कसे प्रलयं विश्वं भीतं स्तब्धं विकम्पितम् ॥

ततः प्रविशति खड्गधारिणी दुर्गा

शृणुत विबुधवर्य्या ब्रह्मकृष्णेन्द्ररुद्रा
न खलु न खलु कालः सृष्टिसंहारसिद्धेः ।
कथमिह तदिदानीं शक्तिमुक्तोत्सवन्तो
ज्वलयथ किल यूयं मोहमुग्धास्त्रिलोकीम् ॥

(नेपथ्ये ज्योतिर्विकाशः)

सर्व्वे—(विस्मिताः पश्यन्ति)

दुर्गा (दृष्ट्वा) सखे ! इयं हि सा शापविमुक्तोर्व्वशी समं श्रीमता दण्डिदेवेनेत एवागच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततः प्रविशतः दण्डिराज उर्व्वशी च

दण्डि—अये ! किमेतत्—

सूर्य्याख्या नियतैकतानमनसः कौपीनमात्रच्छदा-
स्तप्ता वर्षशतानि दुश्चरतपो यान् योगिनो नो विदुः।
ते देवाः कृपयाद्य वत्ससहिता आधिं प्रमार्ष्टुं पुरो
दिष्ट्या येन समागतास्तदधुना धन्यौ स्व आवां चिरात्॥

(उभौ प्रणमतः)

दुर्गा—हन्त हन्त भो देवाः ! यस्याः शापविमोचनार्थमिह भवन्तो मिलिताः सेयमद्य शापविमुक्ता समं महासत्त्वेन श्रीमता दण्डिदेवेन प्रणमति (दृष्ट्वा) अहह ! महामोहेनाभिभूयमानाः कथं भवन्तोऽप्येनां न विबुध्यन्ते (कृष्णं प्रति) रमावल्लभ ! भवन्मायानिरुद्धचेतना देवा नात्मानमप्यवबुध्यन्ते किं पुनरुर्व्वशीवृत्तान्तम्। तदलं मायया ; संह्रियतामियम्।

कृष्णः—एष प्रतिसंहरामि मायाजालम्।

देवाः—नूनं वयमिदानीं प्रसुप्ता इव पुनः प्रतियुद्धाः स्मः।

महादेवः—देवि ! त्वं हि यथा मम तथा सर्व्वेषामपि शक्तिरसि।

ब्रह्मा—सर्वशक्तिमयि ! त्वया किल यया शक्त्या रक्षितं त्रिभुवनम् पुनस्तयैव शक्त्या—यथा मनस्विना सूर्य्यवंशावतंसेन दण्डिदेवेन सार्द्धं वत्सेयमुर्व्वशी कामं कामयमाना प्रणयप्रकर्षमुग्धमानसा च सती रमयति सर्व्वाः प्रजास्तथा क्रियताम्।

दुर्गा—सुष्ठु मन्त्रितम्। समाप्येतदभिमतम् किं वा मन्यते देवराजः ?

देव—देवि ! भवादृशजनवाञ्छितेषु नास्ति मे कश्चिद् वाक्यावसरः।

दुर्गा—यदुपते ! भवानेवात्र कार्य्यदर्शी पुरोधाः।

कृष्णः—अवन्तीराज ! लज्जितोऽस्मि भवद्राज्यावरोधापराधाद्भवतः

किन्तु— विनष्टं नो राज्यं न च परिजनः कोऽपि निहतो
न विध्वस्तः कोषो यदुबलगणैर्यश्च नगरीम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरुद्धां वा ह्यांहा निनदमुखरां पश्यति भवान्
मृषा तं सैन्यानां गणयतु विलापं नरपते ।

तत् प्रतिपद्यतां यादवपरिरक्षितं निर्विघ्नमिदं राज्यमियम-प्युर्व्वशी भवत एवार्घ्यभूता भूयात् ।

दण्डि—देव ! अमोघगम्या हि मानवैर्देवकार्य्यपरम्परा ।

उर्वशी—(स्वगतम्) हन्त जीविदास्मि ।

कृष्ण:—धर्म्माधिराजनन्दन ! एवमेव विदितमस्तु जगतां यथा किल—

घोरं ध्वान्तं हरति तपनो नोज्ज्वला दीपमाला:
सिंहश्चैको जयति करिणो नापि मेषा: सहस्रम् ।
पृथ्वीं धत्ते विषधरपतिर्नापर: कोपि जीवो
यूयं तद्वत्प्रथितयशस: केवलं नान्यभूपा: ॥

युधि—भगवत्प्रसादात् सर्व्वमेतत् सम्पद्यते ।

दुर्गा—वत्स ! युधिष्ठिर ! त्वनैव पुण्येन कर्म्मणा त्वया त्रिभुवनमद्य सनाथीकृतम् । तदिदानीं ते यशोराशिमुन्नायतु विश्वम् ।

युधि—भगवति ! मूढ़: किमहं वदामि नात्र किञ्चिद् यन्न भाव्य भवत्प्रसादात् ; यत:—

सृष्टिस्त्वं लयलीनानां लय: सृष्टस्य वस्तुन: ।
त्वमाद्या प्रकृतिर्नित्या त्वं शक्तिर्विजयात्मिका ॥

दुर्गा—वत्से उर्व्वशि !

एष तेऽस्तु भवत्स्वामी गतिरेषोऽस्ति ते शुभे !
हित्वा य एष सर्व्वं स्वं वत्सां त्वामनुयातवान् ॥

अद्यावधि त्वमैक्ष्वाककुलवधूरसि ।

भीम—(प्रविश्य ेव साधिक्षेपम्) भो भो: क्षत्रियवीरा: ! कथं भवन्तो निर्व्वीर्य्या इव युद्धाद्विरमन्ति । हन्त भो: कष्टम्—

तीर्त्वोत्तुङ्गतरङ्गनक्रभुजगाग्राहाग्राकुलं भीषण-
दुष्पारं लवणाम्भसं किमिति भो यूयं तटे मज्जथ ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रान्त्वा दुर्गमभूधरं समतले दंन्य भजध्वे कथं
लङ्घित्वा निशि कापथं कथमुषा काले हता: स्थ स्थले ?

युधि—वत्स ! वृकोदर ! नेदं युद्धस्थलं ; तद्विरम विरमातिप्रसङ्गात् ।

भीम:—कथम् ?

युधि—उर्व्वशीशापमुक्ति: चात्रधर्म्मप्रतिष्ठा चाघटनघटनपटोयसा यत्-क्रपाकटाक्षमात्रेणैव सम्पादिता, सेयं भगवती करुणार्द्र दृष्टि-स्त्वामवेक्षते । तत् वत्स ! प्रणम ।

भीम:—(सहसा निरीक्ष्य) हंहो ! को नामायमभ्युदय: । भगवति ! नमस्ते (प्रणमति)

दुर्गा—विजयतामव्याहतप्रतिज्ञस्य ते चात्रो धर्म्म:, पुनातु त्वां ज्योतिषां ज्योतिरेकमव्ययम् ।

भीम:—अथ दण्डिदेवस्य का वार्त्ता ?

दण्डी—क्षत्रियप्रधान ! भवत्-पुण्येनाद्य कीदृगसम्भावितपूर्व्वं कल्याणं सञ्जातं यथा शापविमुक्तामुर्व्वशीसहम् प्राप्तोऽस्मि ।

कृष्ण:—वत्स ! किं बहुना

उर्व्वंशी शापमुक्ता त्वं कीर्त्तिमानसि भूतले ।
सर्व्वनाशश्च देवानां युष्मद्धर्म्म: प्रतिष्ठित: ॥

तत् वत्स ! भीमसेन ! दण्डिराज ! अन्ये च वीरप्रधाना: ! किमत: परं प्रियं करवाम ।

भीम:—भगवन् ! अत:परमपि प्रियमस्ति । तथापीदमस्तु

भरतवाक्यं—

मेघ: पीयूषधारा: स्रवतु, वसुमती शोभतां शस्यपूर्णा,
धर्म्मं ध्यायन्तु वर्णा: क्षितिपतिरवनिं पातु शश्वद्विपक्ष: ।
चन्द्रालोकादिवाभो भवतु कविमन: स्फीतमुच्छ्वासयुक्तं
नाट्यालङ्कारदोषान् हरतु भगवती भारती नित्यशुद्धा ॥

सम्पूर्णोऽयं ग्रन्थ: ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवेदनम्

अयि श्रीमन्तः सारस्वतप्रियबान्धवा विद्वन्मुकुटमणयः!

विदितमस्तु भवतां यदद्य संसारसुलभपरःसहस्रविपत्सम्पात-समतिक्रमेण सप्तमं संवत्सरमतिक्रम्य चरणपातमष्टमे वर्षे कृतवतीयं संस्कृतसाहित्यपरिषत् परितः परिकीर्णकीर्त्तिप्रताना प्रतनोति प्रकाश्य-मानप्रकर्षाया भारतवर्षहर्षभूतायाः सुरसरस्वत्याः कामपि काम्यसम्पदं परमकारुणिकपरमेश्वरानुकम्पया नक्तन्दिवमानन्दयन्ती मन्देतरविद्वत्-सम्प्रदायम्।

एतस्यां किल जन्मदिवसात् प्रभृति प्रभूतप्रशस्तजनकरुणादृष्टि-पातो नितरामस्माकमाशास्थानमभूत् पुनरपि कालेन सुरभारतीसमुन्नति-वृत्तान्ते। इयमपि प्रतिदिवसमुपजायमानोदया दयावतां महोदयानां सदयदृष्टिपातं सुचिराय यथा स्वीयगुणसम्पदैव सम्पादयितुमलं सम्पद्येत, तथैव प्रतिक्षणं प्रवर्त्तेत इति क्रमोन्नतिमिवास्याः समुन्नतं समर्थयामहे। तथाचेयं प्रतिमासमेकां विद्वत्सङ्गतिमङ्गलमङ्गीकुर्वाणा प्राक्तनशास्त्रतत्त्वानि प्रकर्षेण प्रचारयन्ती, सुरभारतीमधिकृत्य परस्परं संवादकृत्यमनुकूलयति, प्राच्यविद्यावतां पाश्चात्यविद्यावताञ्च मिथो विलक्षणप्रेक्षाविनिमयमातनोति, गम्भीरतत्त्ववेदिनाम् अनाविलप्रतिभा-प्रसूतनिबन्धरत्नमाहरन्ती विद्वत्समाजे साकूतमुपायनीकरोति, विदित-भूयिष्ठानां परीक्षितप्राच्यविद्याप्रकर्षाणाम् आचार्य्यवर्य्याणां असम-साहायकेन विद्यार्थिनो विविधशास्त्रतत्त्वानि स्वीयविद्यालये समु-पदिशति, यथायोग्यवृत्तिनिष्पादनेन दरिद्रविद्यार्थिनां परिपोषणमङ्गी-कुरुते, यथाप्रकर्षञ्च विद्यार्थिनां पुरस्कारणमपुरस्कारोति। प्राचीन-कविनिबद्धानां रूपकाणामभिनयकौशलेन सामाजिकमानसमावर्जयति, तद्द्वारा च वाचामुच्चारणविशुद्धिमध्यापयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्यविद्यानां भूयसे प्रचाराय तद्गतगभीरलुप्ततत्त्वसमुन्मेषणाय तत्त्वमभिजिगमिषूणां तत्त्वाधिगमसौकर्य्यसम्पादनाय च सुमहद् ग्रन्थागारमेकमारचयति, यत्र साम्प्रतमेव प्रायेण पञ्च सहस्राणि प्राचीनग्रन्थरत्नानाम् उपलभ्यन्ते। हस्तलिखितेषु परःसहस्रेषु ग्रन्थरत्नेषु यथोपयोगं मुद्राङ्कनेन कतिचित् प्रकाशं नीयन्ते। किं बहुना, एतदत्र सगर्व्वमेव शक्यते प्रतिपादयितुं यदय्यत्वे संस्कृतसाहित्यसमुन्नतये सुतरामपेक्षितमपि तथा प्रतिष्ठानमन्यत्र परमन्विष्यमाणमपि बहुलं नोपलभ्यते इति।

एतेषां परमवृत्तान्तानां सर्व्वत्र भारतवर्षे निवेदनाय, सर्व्वेषामवसाहायकसम्पादनार्थमुन्मुखीकरणाय, परिषत्परिनिष्ठितविशिष्टशिष्टनिरूपिततत्तद्गभीरतत्त्वविज्ञापनाय, समयोचितसमाचारप्रचारणाय, तथा साधारणेषु सुरभारतीरसनिषेकसम्पादनाय फलविशेषविभूतये च परमपेक्षिता संस्कृतसाहित्यपरिषदभिधाना संस्कृतपत्रिका परिषदो द्वितीये संवत्सरे प्रियवयस्यापदमङ्गीकुर्व्वती यथावसरमद्य यावत् परिषदमाङ्गल्येषु नितरामनुकूलयन्ती सुगृहीतभागधेया निजनामधेयप्रतिष्ठां प्रतीष्टवती समाश्वासयति गीर्व्वाणवाणीचरमश्वासविश्वासवतामपि पाश्चात्यविद्यावतामन्तःकरणानि।

इयमतिगभीरार्था दार्शनिकनिबन्धेषु, परमकोमला रसवती काव्यचिन्तासु, धर्म्मोपचारा स्मृतिपुराणेतिहासादिषु, सूक्ष्मतत्त्वावेदिका विज्ञानविभवेषु, नित्यनूतनसमाचारप्रचारपरा पारिपार्श्विकवृत्तेषु, प्रकर्षापकर्षनिरूपणचतुरा च सारस्वतवन्धेषु।

तदस्या भारतवर्षप्रकर्षभूतायाः समुन्नतिलाभे केवलं गीर्व्वाणवाणीप्रणयिनामेव समुत्साहः साहायकमवलम्बते। स चायं समुत्साहो द्वेधा भवितुमर्हति अर्थप्रतिपादनद्वारा निबन्धसम्पादनद्वारा च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न हि परस्परमनपेक्षमाणावर्थनिबन्धौ पत्रिकासमुन्नतिं सम्पादयितुमलं ; तदत्र द्वावेव सुतरामपेक्ष्येते, परन्तु पारिषदानां सदयदृष्टिपातेन लभ्यमानेष्वपि पत्रिकाप्रकाशोपयोगिष्वर्थेषु निबन्धदारिद्र्यमस्मानन्तरान्तरा विषादं लम्भयति, तदाशास्महे यथा संस्कृतविद्याविद्योतितमतयः सानुकम्पमल्पमपि लेखपरिश्रममङ्गीकृत्य नित्यनिरतिशयगुणायाः भारतवर्षवैगुण्यवियोगानुगुणायाः गीर्व्वाणगिरो मधुरमधुरामाकृतिं पुनरपि सज्जनसमाजे प्रकटय्य निजपितृपितामहादीनां विलुप्तप्रायं गौरवमेतत्पत्रिकाद्वारेण प्रचारयेयुरिति ।

अत्र हि काव्यपुराणेतिहासश्रुतिस्मृतिव्याकरणालङ्कारदर्शनादिविषयकाः सर्व्वविधा एव निबन्धाः सादरमस्माभिरुपादीयन्ते, तत् स्वस्वप्रवृत्तिसामर्थ्यानुसारेण सर्व्वेषामेवात्र निबन्धनिष्पादने भूयानधिकारः । अयि भोः संस्कृतविद्यारसिकाः ! अलमद्यापि आलस्येन, क्रियतां यथाशक्ति निबन्धसम्पादनेषु परिकरः, समुन्नतिं नीयतामियं भवदपेक्षया दीनदीनं वर्त्तमाना विलुप्तसम्माना सुरसरस्वती, तेन न केवलमस्याः, परं भवतामपि देवीं वाचमुन्नमयतां शाश्वतिकं कल्याणमारादुपतिष्ठेत इति—

विधेयनिवेदकयोः
महामहोपाध्याय-श्रीदुर्गाचरणसांख्यवेदान्ततीर्थ-
तर्कतीर्थोपाधिक-श्रीकालीपदतर्काचार्य्ययोः
संस्कृतसाहित्यपरिषत्पत्रिकासम्पादकयोः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समालोचनम्।

उद्वाहतत्त्वम्। सटीकानुवादं सपरिशिष्टञ्च। महामहोपाध्याय-श्रीमद्रघुनन्दनभट्टाचार्य्यप्रणीतम्। कलिकाताविश्वविद्यालयाध्यापकेन स्मार्त्तप्रवरेण श्रीमता कृष्णाचरणतर्कालङ्कारमहाशयेन सम्पादितम् प्रकाशितञ्च। २६४ पृष्ठात्मकम्। मूल्यं राजतमुद्राद्वयम्।

अत्र ग्रन्थे मूलं, काशीरामकृतटीका, तर्कालङ्कारमहाशयकृततत्त्व-बोधिनीसमाख्यटीका, वङ्गानुवादः परिशिष्टञ्च वर्त्तन्ते। एतद्ग्रन्थ-सम्पादने तर्कालङ्कारमहाशयेन भूयोदर्शनसुलभप्रगाढ़पाण्डित्यम्, छात्रवत्सलता वह्वायासस्वीकारश्च प्रकटितम्। संक्षिप्ता काशीराम-टीका नेदानीन्तनच्छात्रेभ्यः सम्यग् रोचते। बहुत्र मूलमत्राव्याख्यात-मास्ते। मूलाध्ययनोत्थिताः संशया अपि सर्वत्र न निराकृताः काशी-रामेण। तत्त्वबोधिनी तु सुविस्तरभाषिण्यपि वह्वर्था बुद्धिमत्-पाठकानां सन्देहकूटतमोपहा च। न केवलमत्र मूलमशेषं व्याख्यातं नवीनानि विज्ञेयवस्तून्यपि बहूनि वयमत्र विज्ञातुमीश्महे। तत्त्व-बोधिनीपाठकानां पत्रिकान्तरेण नास्ति किमपि प्रयोजनम्। अधीत-न्यायविद्यास्छात्रास्तत्राधिकं रंस्यन्ते। प्रश्नोत्तराभ्यां गुरुशिष्यसंवाद-रूपेण विहिते वङ्गानुवादे छात्राः साधारणपाठकाश्च मूलार्थेन समं शास्त्रार्थविचारशैलीञ्च शिक्षितुं शक्ष्यन्ति। परिशिष्टेऽंशे सम्बन्धगणना-कौशलं गोत्रप्रवररहस्यञ्च विशदं व्याख्यातमास्ते, यद्धि अन्यत्र कुत्राप्येकत्र सविचारयुक्तिकमेव आलोचितं न वयमालोकयामः।

मन्यामहे ग्रन्थस्यास्य मुद्रणशोधनविधौ तर्कालङ्कारमहाशयेन न सम्यगवधानं दत्तम्। अनाशङ्किता एव भूरिवर्णाशुद्धयोऽत्र सन्ति। वङ्गानुवादस्य भाषाशैली पाण्डित्यगहनापि नाधुनिककालोचितेति न वक्तुं न पारयामः। ग्रन्थोत्कर्षविचारेण मूल्यमस्य राजतमुद्राद्वयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमपि नाधिकं, किन्तु ग्रन्थोपादानपत्राणि न चास्य ग्रन्थस्य न वा मूल्यस्यानुरूपाणीत्यपि ब्रूमः।

यथा तथा वास्तु उद्वाहतत्त्वस्येत्थमसाधारणं व्याख्यानं नेतः प्राक् प्रकाशितमिति निःसंशयम्। न केवलं छात्रा गुरवोऽपि एतद्ग्रन्थ-विलोकनेन उपकारविशेषं लप्स्यन्ते।

सन्देशाः।

उपाधिप्राप्तिः—अद्यत्वे अयं नामावशिष्यते राज्ञां प्राच्यविद्यागुण-ग्रहणस्यैकोवकाशो यत् तद्विद्यावत्सु विशेषवेदिनः केचित् प्रतिवर्षं महामहोपाध्याय इत्युपाधिविशेषेणालंक्रियन्त इति। तत्र सत्यपि कदाचिदनवधानं सम्पादिते राजपुरुषैस्तदभिमतपण्डितानां विद्या-प्रकर्षविचारे 'महामहोपाध्याय' पदं नूनमद्याप्यतिवैशिष्ट्यं सूचयति संस्कृतज्ञानाम्। साम्प्रतं खृष्टीयनवीनवर्षप्रारम्भे विक्रमपुरवास्तव्याः कलिकाताविश्वविद्यालयाध्यापकाः श्रीमन्तः कृष्णचरणतर्कालङ्काराः, कलिकातामधिवसन्तो विविधग्रन्थसम्पादकाः श्रीमन्तश्चण्डीचरण-स्मृतिभूषणाः, वाराणसेयास्तत्रत्यहिन्दुविश्वविद्यालयाध्यापकाः श्रीमन्तः प्रभुदत्तशास्त्रिणश्च लब्धमहामहोपाध्यायोपाधिकाः संवृत्ता इत्यति-शयेनाभिनन्दामो वयम्। महापण्डितास्ते संस्कृतसाहित्यपरिषदः सदस्याः शुभशंसिनश्चेत्यस्माकमेतद् विशेषतः प्रमोदमुत्पादयति। एते हि शिष्यसंवेदनपाटवेन ग्रन्थनिर्म्माणप्रदर्शितपाण्डित्ये न च प्रसारित वैदुष्यकीर्त्तयश्चिरादेवात्मनस्तदुपाधिलाभयोग्यतामातन्वन्ति। एतेषां सम्माननेन सर्वथा प्रकटितं राजपुरुषाणां योग्यायोग्यनिर्णयनैपुण्यम्। करुणापारावारं परमेश्वरं प्रार्थयामहे—सुचिरं वर्द्धतामेतान् राजप्रसाद-मुपभुञ्जानान् पण्डितधौरेयानवलम्बमाना भगवती संस्कृतविद्येति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीश्रीसारदेश्वरीविद्याश्रमः— अद्य बहुसमाः समभवन् कलिकातामहानगर्य्यां श्रीश्रीगौरीपुरीदेव्या सुप्रतिष्ठापितस्य श्रीश्रीसारदेश्वरीविद्याश्रमस्य। तत्र नियमेन बालिकानां सनातनधर्म्मानुकूलप्रथानुसारेण स्त्रीजनोचितचारित्रस्थितिव्यवस्थापनेन संस्कृतप्रधानशिक्षायाः प्रवर्त्तनमस्तीति परं प्रमोदस्थानं नः। तत्र च सम्प्रति सुतरामिदमाशास्थानं यत् एतावत्कालं भाटकेन परकीयगृहमध्यासीनः सोऽयं विद्याश्रमः केषाञ्चन तथा शिक्षानुरागिणां महानुभावतया प्रदत्तेन प्रदास्यमानेन चार्थसञ्चयेन श्रीश्रीगौरीपुरीदेव्याः प्रवयसोऽपि प्रौढ़जनोचितसमुत्साहेन तथा केषाञ्चन सत्कर्म्मसम्पादनसमुत्साहिनां निरन्तरपरिश्रमेण स्वीयमावासमध्यासितुं प्रवर्त्तते। स चावासः कलिकातानगर्य्यां श्यामविपणिसन्निहिते बलरामघोषवर्त्मनि सुतरां नैपुण्येन स्थपतिभिः सम्पाद्यते तदाशास्महे न चिरादस्य कृत्यपूर्त्ति नानाविधप्रशस्तशिक्षाणां सुप्रसारम्। सर्व्वथा तत्र सहायभूतानां भगवान् भूतनाथो भव्यमव्याहतमुपदिशत्विति।

विचारपतेरवसरः—विदितमस्तु सम्प्रति पाठकमहाभागानां यथा नानागुणाधाराः स्वनामधन्याः श्रीमन्तः स्यर्‌उतुपाधिकाः बहुविधानुपाधीनङ्गीकरणेन कृतार्थीकृतवन्तः पृथिवीरत्नभूता आशुतोषमुखोपाध्यायसरस्वतीपादाः सुचिरं सुप्रशंसं कलिकाताप्रधानविचारालये विचारपतिपदमर्य्यादामनुभूय साम्प्रतं तत्पदादवसरं समलभत। अस्य तदानीन्तनकृत्यकीर्त्तीः सुमहान्तमेव कालं स्मरिष्यन्ति विचारचतुराः पारम्पर्य्येन। महत्तमस्यास्य सर्व्वेष्वेव विषयेषु दृष्टार्थ एव महिमा। तदिदानीमाशास्महे यदयमनन्यकर्म्मा स्वप्राणभूताया विश्वविद्यायाः कृते जीवनव्यापिपरिश्रममचिरादेव सफलं कुर्य्यात्। सरस्वती नाम तमपेक्षमाणा सुचिरं वर्त्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

কালীতন্ত্র—এইরূপ উপাদেয় তন্ত্র এই পর্য্যন্ত আর কোথাও প্রকাশিত হয় নাই। অনেকগুলি প্রাচীন হস্তলিখিত পুঁথি হইতে পাঠ উদ্ধার করিয়া বহু পাঠান্তর, বিস্তৃত সংস্কৃত টীকা ও বঙ্গানুবাদ সহ সংস্কৃতসাহিত্যপরিষৎ হইতে পূর্ণানন্দবংশীয় তান্ত্রিক পণ্ডিত শ্রীযুক্ত সতীশচন্দ্রসিদ্ধান্তভূষণ মহাশয়ের সম্পাদকতায় প্রকাশিত হইয়াছে। কালীর ধ্যানের ব্যাখ্যা সম্বন্ধে নানারূপ মত ভেদ আছে। সেই সকলের মীমাংসাপূর্ব্বক বিস্তৃত ব্যাখ্যা প্রদত্ত হইয়াছে। মূল্য ।৵০ দশ আনা মাত্র। পরিষদের সভ্যগণের পক্ষে ॥০ আট আনা মাত্র।

শঙ্করীসঙ্গীতম্—গীতগোবিন্দের অনুকরণে প্রাচীন কবি জয়নারায়ণের রচিত গীতিকাব্য। মূল্য ।৵০ ছয় আনা, পরিষৎসভ্যের পক্ষে ।০ চারি আনা মাত্র

প্রাপ্তিস্থান—সম্পাদক, সংস্কৃতসাহিত্যপরিষৎ।
শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

চ্যবন প্রাশ—৩৲ সের।] [মকরধ্বজ—৮৲ তোলা

অধ্যক্ষ মথুরবাবুর

ঢাকা শক্তি ঔষধালয়।

(১৩০৮ সনে স্থাপিত)

ঢাকা, কলিকাতা, ময়মনসিংহ, চট্টগ্রাম, শ্রীহট্ট, রঙ্গপুর, গৌহাটী, জলপাইগুড়ি বগুড়া, সিরাজগঞ্জ, কাশী, পাটনা, লক্ষ্ণৌ ও মাদ্রাজ।

কলিকাতা ব্রাঞ্চ—৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড ভবানীপুর।

ঢাকা শক্তি ঔষধালয়ের ঔষধের বিশিষ্টতা

প্রত্যক্ষ ফলপ্রদ শাস্ত্রীয় ঔষধগুলি বিশ বৎসরেরও অধিককাল যাবৎ পূর্ণমাত্রায় ও বিশুদ্ধভাবে বার বার প্রস্তুত করিয়া ঔষধে "ঋষিশক্তি" বজায় রাখিতে শক্তিঔষধালয় যে সুবিধা ভগবানের কৃপায় পাইয়াছে তাহা কুত্রাপি কেহ পায় নাই। সেই জন্যই শক্তিঔষধালয়ের ঔষধের একটা "বিশিষ্টতা" জন্মিয়াছে; অর্থাৎ শক্তি ঔষধালয়ের ঔষধের প্রস্তুত প্রণালী, পাক প্রণালী, আস্বাদন, উপকারিতা ও বিশিষ্টতা নিশ্চয়ই অনন্যসাধারণ। একথা গ্রাহকগণের হৃদয়ঙ্গম করিয়া দিতে পারিলে বিশেষ একটী লোকহিতকর কার্য্য করা হইবে মনে করিয়াই "ঢাকা শক্তিঔষধালয়ের ঔষধের বিশিষ্টতা" সংক্ষেপে বুঝাইতে চেষ্টা করিলাম, বুদ্ধিমান বুঝিয়া লউন এবং "আত্মহিতায় বহুজনহিতায় চ" এই সত্য গ্রহণ করুন।

শক্তিঔষধালয়ের কারখানা পরিদর্শন করিয়া:—হরিদ্বারের মহাত্মা শ্রীমৎ **ভোলানন্দ গিরি** মহারাজ অতিশয় আনন্দে উৎফুল্ল হইয়া বলিয়াছিলেন— "এছাকাম সত্য, ত্রেতা, দ্বাপর, কলিমে কো'ই নেই কিয়া, আপ্‌তো রাজচক্রবর্ত্তী হায়।" রামকৃষ্ণ মিশনের ভূতপূর্ব্ব প্রেসিডেন্ট শ্রীমৎ **ব্রহ্মানন্দ স্বামী** লিখিয়াছেন— "এরূপ বিপুল আয়োজনে ও বহুল পরিমাণে ঔষধ (Manufacture) প্রস্তুত হয় দেখিয়া আমি বড়ই সন্তোষ লাভ করিলাম। এখানে প্রত্যেক ঔষধই অধ্যক্ষের বিশেষ তত্ত্বাবধানে এবং ঠিক ঠিক শাস্ত্রীয় বিধান অনুসারে প্রস্তুত হইতেছে।" ইত্যাদি—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ।
এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তপুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১॥০ দেড় টাকা, ৩ শিশি ৪৸০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४५ शकाब्दे माघे | Reg. No C. 1073. | ६ष्ठ वर्षस्य १०म संख्या
February 1924. Vol. VI. No. 10

संस्कृत साहित्य परिषत्

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च

सहकारिसम्पादकः श्रीजानकीनाथसाहित्यशास्त्री ।

सौरस्वराष्टकम्	३६१	प्रशस्तिः	३९१
शास्त्रसामञ्जस्यम्	३६४	शताब्दी महोत्सव	३९४
नलदमयन्तीयम्	३६७	स्वागतसङ्गीतकम	३९५
उपासना	३७७	शताब्दीमङ्गलपञ्चकम	३९७
दुर्गेशनन्दिनी	३८१	संस्कृतसाहित्येतिहासः	३९९
अभिनन्दनम	३८८		

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।

Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটা চিত্ত প্রফুল্ল থাকে। কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতি শিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায়বিক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফূর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অব্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ।৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজ-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড্।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



महामहोपाध्याय कालीप्रसन्न भट्टाचार्य्य एम, ए,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४५ शकीये माघे, ६ष्ठ-वर्षस्य १०म-संख्या

सारस्वताष्टकम् ।

आयुर्वेदाचार्य्यः श्रीहेमेन्द्रचन्द्रव्याकरणतीर्थः ।

(१)

मातर्भगवति ! शतशशिभास्वति !
सद्वंस्वरतिपतिकान्ततरे !
हृदि पदमर्पय, तामसमपनय;
नवरुचिकिशलयचारुकरे !
सुललितचरणे ! मृगशिशुनयने !
त्रिभुवनभवने नित्यरते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु सति ! दीननुते ॥

(२)

धरणाचुम्बित- मेघविनिन्दित-
चिक्कणकुञ्चितकेशकुले !
नतनिर्ज्जरगण- शीर्षविघर्षण-
मणिमयूखारुणपादतले !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रितमतूल- तनुतरकोमल-
रजतसुनिर्म्मलवस्त्रवते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

(३)

अमलकमलदल- रुचिरसुकोमल-
मततपनोज्ज्वलदेहधरे !
मञ्जुलमधर- निर्ज्जितसुन्दर-
वदनसुधाकररम्यतरे !
त्वमसि प्रवीणा नित्यनवीना
सुललितवीणावादरते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

(४)

दलमवदुष्कृत- हास्यविकासित-
मौक्तिकनिन्दितचारुरदे !
सितदशशतदल- निर्म्मितनिर्म्मल-
सद्यासनतलदत्तपदे !
मरालपत्रे ! जननि ! पवित्रे !
मय्यपवित्रे पादनते
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

(५)

सूर्य्यकिरीटिनि ! सुवर्णविमोहिनि
सूर्य्यकान्तमणिशुभ्ररुचे !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सततस्यन्दित- विज्ञानामृत-
शैलप्रसुन्नतपीनकुचे !
प्रसूनसुन्दर- हारमनोहर-
कण्ठि ! द्विपवरमन्दगते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

(६)

वयोप्रसूते ! विबुधपरीते !
गीतसुनीते ! वर्णमयि !
ज्ञानपयोनिधि- तितीर्षुजनहृदि
निवससि निरवधि शान्तिमयि !
त्वं श्रुतिराद्या जगदाराध्या
निर्म्मलविद्या कल्पलते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

(७)

दैवतभाषे ! सुमधुरभाषे !
जाड्यविनाशे ! बुद्धिप्रदे !
स्नातमनीषि- मानससरसी-
सञ्चारहंसि ! भावनिधे !
श्वाससुसौरभ- मृगमदगौरव-
हारिणि ! धीधनदानरते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु मति ! दीनसुते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

मम घनतिमिरे हृदयकुटीरे
विश विश धीरे ! ज्ञानमयि !
सुचिरनिरुद्धां हर मेऽविद्यां
विशुद्धविद्यां देहि मयि !
करुणासारे ! "हेम" नूपुरे !
नृत्य मदन्तर्विश्वसुते !
देवि सरस्वति ! नवनवरसवति !
करुणां कुरु सति ! दीनसुते ॥

शास्त्रसामञ्जस्यम् ।

(पूर्व्वानुवृत्तम्)

लेखकः महामहोपाध्यायश्रीकैलासचन्द्रकाव्यव्याकरणसांख्यपुराणतीर्थभट्टाचार्य्यः ।

हे समितिप्रवर्त्तका महात्मानः ! मन्ये भवन्तोऽपि सर्व्वदर्शनसंग्रहकृन्माधवाचार्य्यवत् साम्प्रदायिकवेदान्तवादानुवर्त्तिनः । कथमन्यथा तृतीयपञ्चमषष्ठेषु प्रबन्धनिर्द्देशवाक्येषु षण्णामार्षदर्शनानां मध्ये विना वेदान्तं सर्व्वाण्येवोल्लिखितानि ? हन्त भोः ! यदि व्याससूत्रे शाङ्करभाष्यमेव प्रमाणीकृतं भवद्भिस्तदा किमिति साङ्ख्ययोगपाशुपतादिदर्शनसार्थक्यमिति प्रश्नावतारः कृतः ? तेन हि भाष्यकारेणाविरोधाध्यायं खण्डनाध्यायीकुर्व्वता सर्व्वाण्येवान्यदर्शनादीनि तुच्छीकृतानि । किं बहुनोक्तेन "आदिविद्वान् निर्म्माणचित्तमधिष्ठाय कारुण्याद्भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाचेति" इत्येवं योगभाष्यादिषु बहुषु ग्रन्थेषु यस्य महिमा ब्रह्मसूत्रकृता कीर्त्तितस्तस्यैवालोकलोकतापि भाष्यकृता परिकल्पिता । सुतरां भवतामपि कियतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र कथञ्चिदनास्थैवोद्भिन्ना परिलक्ष्यते साङ्ख्यादिसार्थक्यविषयक-प्रश्नोपस्थापनात्। तस्मान्मयापि सम्प्रदायविद्वेषभयगृहीतं मौन-मपहाय श्रवणोत्सुकानां महतां पुरतः सर्व्वदर्शनसार्थक्यनिवेदनम् क्रियते।

तत्र षड्दर्शनमेवाप्तोपदेशत्वात् सामान्यतः प्रकृतपुरुषार्थसाधन-मिति प्रतिज्ञायते। आप्ताः के नामेत्याकाङ्क्षायां भ्रमप्रमादविप्रलिप्सा-रहितत्वमाप्तत्वमिति सुप्रसिद्धमेव तल्लक्षणं सामान्यतो ग्राह्यं, विशेषतश्च

"रजस्तमोभ्यां निर्म्मुक्तास्तपोज्ञानबलेन ये।
येषां त्रैकालममलं ज्ञानमव्याहतं सदा॥
आप्ताः शिष्टा विबुद्धास्ते तेषां वाक्यमसंशयम्।
सत्यं वदन्ति ते, कस्मादसत्यं नीरजस्तमाः?

इत्येवं चरकीयसूत्रस्थानादौ द्रष्टव्यम्; अनार्षदर्शनानां गौण-पुरुषार्थसाधनत्वं पश्चादेव प्रतिपादयिष्यते। प्रतिज्ञाते षड्दर्शनस्य परमपुरुषार्थसाधनत्वे प्रथमतस्तावदिदमेवालोचनीयं यदेतानि दर्शनानि किं प्रस्थानभेदाः, किंवैकप्रस्थानमिति, तत्रान्योन्यं विवदमानैः शबरादिभिः प्रस्थानभेदपरिकल्पनया यो महान् व्यामोहः प्रवर्त्तितः, स हि तदाप्तवचसां सामञ्जस्यमभिनिविशमानैर्महात्मभिः सुदूरमपसारणीयः। दर्शनानां तथात्वे हि "नान्यः पन्था विद्यतेऽय-नाये"ति श्रुतिविरोधभिया कस्यचिदेकस्यैव प्रोक्तसार्थक्यमङ्गीकृत्य अन्येषामानर्थक्यमेवापात्यते शारीरकभाष्योक्तदिशा। ततश्च सर्व्व एवैकदेशिनो यथापूर्वं विवदिष्यन्ते, न तु युगसहस्रैरपि सामञ्जस्यमुप-लभ्येत भवद्भिरतः सर्व्वाण्येव साम्प्रदायिकमतानि वह्निप्रावारकभस्मवत् फूत्कारेणोत्क्षिप्य दृश्यतामार्षविज्ञानालोकः। यदेवमार्षदर्शनाना-मेकत्र स्थानत्वं मया प्रस्तूयते, तदप्यभिनवसाम्प्रदायिकवादोपस्थाम-मिति न शङ्कितव्यं भवद्भिर्मया हि विहायार्षवाक्यं नैकमप्यक्षरमभि-धास्यते सामञ्जस्यसिद्धान्तायेत्यनुसन्धातव्यमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तदर्शनीयतृतीयाध्यायचतुर्थपादे "पुरुषार्थोऽतः शब्दादिति बादरायणः ॥१॥ शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥२॥ आचारदर्शनात् ॥३॥ तच्छ्रुतेः ॥४॥ समन्वारम्भणात् ॥५॥ तद्वतो विधानात् ॥६॥ नियमाच्च ॥७॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥ तुल्यन्तु दर्शनम् ॥९॥ इत्येतेषु नवसु सूत्रेषु निष्कृतीकं प्रणिधीयतां निपुणतमैर्भवद्भिरशेषदेशीयविविधविद्याकुशलैरध्ष्कृत-यशोपलब्धनिष्ठाकैः। सूत्रकृतां स्वोक्तेषु दुरूहणीयांशव्याख्यानाय सूत्रान्तरं बहुशो दृश्यते। यथा "चोदनालक्षणोऽर्थो धर्मः" इत्यत्र चोदनाशब्दव्याख्यानाय—"चोदना पुनरारम्भः" इति जैमिनेः सूत्रान्तर-मस्ति। दिङ्मात्रमिदं मया प्रदर्शितं। तथैवात्र बादरायणस्या-प्येतदादिमं सूत्रं ग्रन्थादिमसूत्रस्थस्यातः शब्दस्य व्याख्यानायैवारब्धम्।

तथाहि "अथातो ब्रह्मजिज्ञासे"त्यत्र अथेत्यधिकारानन्तरं अतः प्रयोजनाद् ब्रह्मजिज्ञासा भवतीति प्रथमसूत्रस्य निष्कृष्टोऽर्थः तत्र कुतः प्रयोजनादित्याकाङ्क्षायां दुरूहतया स्वयं व्याख्यायते सूत्रकृता प्रथम-सूत्रस्यादतः शब्दात् पुरुषार्थो बोद्धव्य इति बादरायणो वक्तीति शेषः। निर्वाणमात्रं पुरुषार्थ इति मया प्रागेव स्फुटीकृत्य प्रदर्शितं। तदे-वात्र ब्रह्मजिज्ञासायाः साक्षात् प्रयोजनमिति प्राप्तम्। ननु बादरायण इति वक्तीत्यनेन पुनरन्यश्चापि कश्चिद्वदतीत्याचिस' तत्कथमित्या-काङ्क्षायामाह "शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनि"रिति द्वितीयसूत्रम्। जैमिनिराचष्टे "अथातो धर्मजिज्ञासेति मदीयसूत्रे अतः शब्दात् पुरुषार्थवादो बोद्धव्य इति पुरुषार्थं विहाय पुरुषार्थवादः कथं प्रयोजनीक्रियेत इत्याशङ्कायां शेषत्वादिति पुरुषार्थवादस्यापि पुरुषार्थाङ्गत्वादित्यर्थः। तथा च यथान्येषु न्यायवैशेषिकसाङ्ख्य-योगेषु पुरुषार्थाङ्गानामेव प्रयोजनत्वं तथात्रापि पुरुषार्थवादस्येति दृष्टान्तोपन्यासेन शेषत्वं दृढीकृतम्। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

नाटकम्

(प्रविशति सूत्रधारः)

कालिन्दीकलगानसङ्गतवियत्सञ्चारिविश्वस्वरो,
राधाकुञ्जलतान्तसौरभहरः श्यामप्रभासुन्दरः ।
नन्दानन्दकरक्रियासहचरो गोपीहृदां तस्करो,
गोविन्दो वितनोतु वः शिवपदं शृङ्गारदेवो हरिः ॥

अपि च

भक्तानामभयाय यस्य महिमा दुःखाय कोपाङ्कुरः
पापभ्यस्य यदर्चनासु विनतिः पुण्याय यन्मानना ।
यः स्रष्टा चतुराननः स्थितिकृते विष्णुः शिवः संहृतौ,
सोऽयं वो विदधातु वाञ्छितफलं सर्वार्थकल्पद्रुमः ॥

अपि च

कालं कञ्चन गोकुले व्रजवधूसङ्गादनङ्गीभव-
न्नक्रूरेण जगाम यो हि मधुरां निक्षिप्य शोकेऽखिलान् ।
विस्मृत्येव चिराय गोपजनतामुत्सारयामास यः,
सोऽयं वो वितनोतु वाञ्छितवरं शृङ्गाररङ्गी चिरम् ॥

(निष्क्रान्तः)

(ततः प्रविशति प्रमोदं नाटयन् स्थापकः)

स्थापकः—अलमतिप्रसङ्गेन, नूनमिदमस्माकं प्रमोदस्थानं सामाजिकचित्तमनुवर्त्तयतां, यदस्मत्सतीर्थगीतेन श्रोत्रामृतेन नान्दीसङ्गीतेन दिवापि तारश्च इव सर्वतो भाति रङ्गः ; तथाहि—

दृष्टिर्निश्चलतां दधाति नितरां योगी यथा योगिनाम्,
दिव्यानन्दविलोपमङ्कित इव स्थैर्यं गतो विग्रहः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूरे प्रस्थितमन्तरेण सहसा कस्यैचिदासक्तये,
गीतानुस्खनतो न गीतविरतिं सामाजिका जानते ॥

अथवा किमत्र चित्रं यत् सुधाकरः सुधाकिरणसम्पातेन शरीरं, नैवं मानसञ्च सुमनसां सन्तर्पयतीति। तथाहि— एतत्सङ्गीतपरिचयं लब्धवतो ममापि—

यावद्दूरं मूर्च्छनायाः प्रचारस्तावद्दूरं मानसं सम्प्रवृत्तम्।
भावावेशाद् विस्मृतं सर्वमेतद् गीतं लोके सर्वसौभाग्यसीमा ॥

तन्मन्ये शुभोदर्को ऽयं समारम्भो भविष्यतीति, कुतः—

आदौ जलधरमाला विलसति तदनन्तरं वृष्टिः।
कुसुमविकाशादूर्द्ध्वं भवति फलानां समुद्भेदः ॥

(विस्मृतिं नाटयन्) अथ कीदृशस्तावदद्यतनः प्रकृतसमारम्भः ? (स्मृतिमभिनीय) आं स्मृतमिदानीं,—

अद्य खलु निरवद्यविद्याविद्योतितमतीनां वासन्तमहोत्सवे सम्मिलितानां रसभावविदां कोविदमहत्तमानां बहुमानाय पुरन्दरवंशाङ्कुरेण सुगृहीतनाम्ना तर्काचार्य्यपदलाञ्छनेन कविना— समर्पितमस्मासु "नलदमयन्तीयम्" नाम नाटकं यथारसमभिनेतुम्। यस्य हि कवेः

शैशवात् प्रभृति काव्यसम्पदा धीरधीनयति धीरसमाजम्।
पादपो विपुलविग्रहलक्ष्मी सूच्यते प्रथमतः किल पत्रैः ॥

अपि च तत्र

तर्के सुविषमतत्त्वे प्रतिभा प्रथिता यथाकालम्।
नानादर्शनविद्यामाज्ञापयति प्रभोस्तुल्या ॥

अस्ति च सूक्तमिदं कवेरस्यैव तत्र, यथा—

कालानुरूपरचनाप्रचितं यदि स्यात्
काव्यं, तदा कवयितुः कविता चकास्ति।
वीरस्य भूषणमरातिवधे कृपाणं,
शृङ्गाररङ्गसमये तदयोग्यमेव ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद् यावदनेन कालानुरूपप्रसादरचनाललितेन नवीनरूपकेण सामाजिकानाराधयितुं पारिपार्श्विकमामन्त्रयामि। (नेपथ्याभिमुख-मालोक्य) अये! अयाचितादेव जलधरात् प्रस्रवतीयं जलधारा, यदना-मन्त्रित एव स्वयं पारिपार्श्विकः प्राप्तः। अये! किमयं सचिन्त इवो-पलक्ष्यते? भवतु पश्यामि। (तदभिमुखं स्थितः)।

(प्रविश्य सचिन्तः पारिपार्श्विकः)

पारि—भाव, अभिवादये।

स्थापकः—मारिष, सचिन्त इव लक्ष्यसे, तत् किन्नु खल्विदं? कच्चित् नातिमात्रचिन्ताकारणं किञ्चित्?

पारि—भाव, महदिदं चिन्ताकारणमुपनतम्।

स्थापकः—कथमिव?

पारि—भाव, श्रूयताम्,—योऽसौ देवव्रतस्य पुत्रो दानव्रतो नाम बहुलप्रयत्नेन दमयन्तीभूमिकामध्यापितः, स खलु साम्प्रतं परोक्ष-वाञ्छया मया पृष्टो मत्त इव सर्व्वं विशृङ्खलमिव कथयति। अथ तस्य कारणमन्विच्छता मया तदीयप्रियसुहृदो विश्वावसोर्मुखात् श्रुतं, यथा कदाचिदसौ दानव्रतो वसुमित्रस्य भवनं कार्य्यव्यपदेशेन गत्वा यदैव तदात्मजां वसुमतीं चित्रे दृष्टवान्, ततः प्रभृत्येव तस्य मानसविकारः जात इति। तदद्य दमयन्तीभूमिकाभिनयस्य कीदृशी गतिः कर्त्तव्या?

स्थापक—अहो दैवम्!

तटिनी विपुलतरङ्गा तरणी लग्ना तटोपान्ते।
तरितुं वाञ्छति पान्थो मरुता सहसा विभग्नाशो॥

(विचिन्त्य) अथवा मारिष, अलं चिन्तया, अयमहं सर्व्वासु भूमिकासु सुगृहीतपरिचयस्तदधिकारमनुतिष्ठेयम्। अथ मारिष, दानव्रतो नाम नाट्ये सुतरामनुरागवान् आसीत्, सोऽपि तादृशीमवस्थां नीतः कन्दर्पेण? अथवा नास्ति किञ्चिदगम्यं कामदेवस्य, तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामान्महेन्द्रो गुरुदारगामी, पद्मासनो दीव्यति देहजायाम्।
प्रज्ञा च लज्जा च मनोबलञ्च प्रलीयते सर्व्वमिदं स्मरेण ॥

(नेपथ्ये) साधु शैलूषपुत्र साधु, सम्यगुक्तवानसि, "प्रलीयते सर्व्वमिदं स्मरेण" इति।

पारि—भाव, क एष नेपथ्यस्थानगतो भवद्वचनमनुहरति ?

स्थापकः—मारिष, प्रियं नः प्रियम्, एष तावदस्मत्सतीर्थो मित्रगुप्तो विदूषकभूमिकामधितिष्ठन् इत एवाभिवर्त्तते, तदेहि आवापिम स्वनियोगमनुतिष्ठावः। (निष्क्रान्तौ)

प्रस्तावना

(प्रविश्य विदूषकः)

विदू—साधु शैलूषपुत्र साधु, सम्यगुक्तवानसि, "प्रलीयते सर्व्वमिदं स्मरेण" इति। अन्यथा य एव मे प्रियवयस्यः पुरा कौमारसुलभलज्जापिशुनो रमणीनां नामापि नैव स्मृतवान्, सोऽयमिदानीं रमणीजनवियोगदुर्भरमालानं सन्यसानः कथं शोचनीयां दशामनुप्राप्नुयात्, नायं सम्प्रति प्रियेषु रमते, नापि राजकार्य्येषु मनो दधाति, केवलं शून्यान्तःकरण इव शून्यमुदीक्षमाणो दीर्घं दीर्घं निश्वसिति, अन्तरान्तरा च तद्गतेन चेतसा परिचिन्तयतो गण्डाभोगे मुक्तास्थूला अश्रुबिन्दवः प्रवहन्ति। अहो विचित्रशक्तिमानितोऽपि मे प्रियवयस्यः, येन तथाभूतं धाष्टर्यप्रवर्त्तकमपि वेदनासम्भारमन्तर्निरुध्य एतावतो दिवसान् राज्यकार्य्याणि सम्पादितवान्, अद्य तु कामेन सुदुःसहामवस्थां नीतः प्रकाशमानं भावं रचितुकामः पुरोपकण्ठोपवनविहारव्याजमाश्रित्य इह मिलितः। (विभाव्य) अथ कीदृशीयं विदर्भनन्दिनी, यां ललितलावण्यां चित्रगतामीक्षमाणः सुतरामधीरतां यातो मे प्रियवयस्यः ? यादृशी चित्रगतासौ परिदृश्यते, यदि सा तथैव, तदा समुचित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव तादृशो मानसनिर्बन्धो वयस्यस्य ; किन्तु तत्रैव भूयान् संशयः समुदेति, अपि सम्भवति मानुषे लोके तथाभूता कमनीयलावण्यसम्पत् ? यच्च विदर्भप्रत्यागता वन्दिनः कामिनीगुणकथनावसरे तथैव तामुद्घोषयन्ति ; तत्र विदर्भप्रदत्ता उत्कोचविशेषा एव प्रभवेयुः। भवतु यथा तथा वा, दमयन्ती नारीकुलेषु परमामिव प्रशस्तिमुपगच्छति इत्यत्र नास्ति सन्देहः। भवतु साम्प्रतं वनपालमाहूय वयस्यस्य निर्वृतियोग्यं प्रदेशं निरूपयामि। (परिक्रम्य) अये ! एष वनपालो ललितरूपया वनपालिकया सनृत्यसङ्गीतमनुतिष्ठन् इत एवाभिवर्त्तते, भवतु एतयोर्विश्रम्भपरिपालनाय पादपान्तरालमाश्रयामि।

(पादपान्तरालमाश्रयन् स्थितः)।

(ततः प्रविशति वनपालिकया सह सनृत्यसङ्गीतम्
अनुतिष्ठन् वनपालः)

वनपालः— मार्जय लघु पर्णराशिगहनकाननम्,

(चल) काननमनु कुसुमं चिनु सुतनु ! मोहनम् !

वनपालिका—

सलिलसेकमनुधारय रेणुविरहमनुपालय
परिचर नवलतिकाकुलमवनीशरणम्।

वनपालः—(सस्वरं) मिच्छति तव चरणकमलदास एष नोरम्

वनपालिका—(सस्वरं) धिक् प्रहसनमाशु वचनमुपसंहर घोरम्

(कोपं नाटयति)

वनपालः— कुरु कुरु मति कृपया मयि सरललोचनम्

उभौ—(चल) काननमनु कुसुमं चिनु सुजनमोहनम्।

विदू—अहो रागपरिवाहिणी सङ्गीतपद्धतिः !

वनपालः—अले पुत्तप्पसविणि, अवि ओधालेसि, अज्ज इध महालाओ आअदोत्ति ?

वनपालिका—अज्जउत्त ण क्खु ओधालेमि, ता कधं विअ ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनपालः—सुणु, जइ ण ओधालेसि, अज्ज केण वि कालणेन विअलिदहिअओ महालाओ वअस्सवह्मणेण अत्तणकेलएहिं पलिअणेहिं अ अणुगदो काणणं एदं पलिप्पत्तो, ता णिच्चकादव्वं कलिअ अहिअं वि सक्कालं काणणस्स कुलेह्म।

वनपालिका—अध अज्जउत्त, महालाअस्स वि दुक्खं वट्टदि ? जेण सो वि विअलिदहिअओ होदि ?

वनपालः—कुड्डिबिणि, किं णु क्खु, एदं ण जाणेसि, जधा जस्स जाव सुहं, तस्स दाव दुक्खं, जधा णाम महालाओ अहिअं सुहं अणुहोदि, तधा ज्जेव कालणविसेसेण दुक्खं वि अहिअं ज्जेव।

वनपालिका—एव्वं सेदं ?

वनपालः—अधइं।

विदू—अहो निपुणवेदिता वनपालस्य !

वनपालिका—अध एव्वं ठिदे, किं णु क्खु, माणुसी लाअसुहं अहिकामेदि ?

वनपालः—तं क्खु सुहमेत्तविसाणेण मोहादो ज्जेव।

वनपालिका—अध अह्माणं लाआ किं अदो ज्जेव कालणादो लाअघलअं पलिहलिअ काणणुद्देसं पट्ठिदो ?

वनपालः—को वा भणउ ? सुदुग्गमा क्खु लाअचित्तवित्ती, कधं अह्मेहिं अणुहोदव्वा ? ता चिट्ठदु एदं जाव दाणिं अत्तणकेरआइं कज्जाइं सम्पादेह्म। (वनभूमिं संस्कुरुतः)

वनपालिका—णाह, अज्ज क्खु उज्जाणेसुं प्पविसन्तो लाअपुलिसा लुक्खआणं महन्तं विआरं उप्पादअन्तो ण मे रोअन्ति।

वनपालः—कधं विअ ?

वनपालिका—किं ण क्खु पेक्खदि णाहो, एसो वसन्तावदार-रमणिज्जे वि समए अवणीदपुप्फकिसलओ लुक्खसमूहो भूसणसुण्णो विअ लाआ अहिअं ण सोहदि, लुक्खतलेसुं खण्डिदा पुप्फकिसलआ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूलकिलणमिलाणा अहिअं मानसदुक्खं उवजणअन्तो राअन्ति।

वनपाल:—कुडुम्बिणि, किं एत्थ दुक्खं, लाअपुलिसाणं किदे ज्जेव संवडिढदा अह्मेहिं रुक्खआ, ता जइ लाअपुलिसा ज्जेव तधा अणुचिट्ठन्ति, णं कइत्था क्खु एदे।

वनपालिका—तह वि पुत्तआणं सलीलक्खोहो विअ लुक्खआणं पुप्फकिसलअब्भंसो मं दुक्खावेदि।

विदू—युज्यते, वनपालिकायाः पुत्रकेष्विव वृक्षकेषु स्नेह एवम् अनुभावयति।

वनपाल:—अले जहा तहा होदु, एहि रुक्खएसुं जलं सिञ्चेह्म।

वनपालिका—जहा आणवेदि अज्जउत्तो! (इत्युभौ परिक्रामतः)

विदू—(दृष्ट्वा) अये एष वनपालो वनपालिकया पादपालवालेषु सलिलसेकाय इत एवाभिवर्त्तते, तत् कथमिदानीं आत्मपक्षः परिरक्ष्यताम? अथवा, किमात्मपक्षपरिरक्षणचिन्तया, अहं खलु प्रबलपराक्रमस्य निषधराजस्य वयस्यो, यदेव मया प्रस्तोतव्यं, तदेवात्मपक्षपरिरक्षणक्षमं भवेत्, तदलमन्यथा शङ्कया, अथवा यदि नासिकागर्जनेन निद्रां नाटयेयं, तदैव स्वपक्षो रक्षितः स्यात्, तदेवमेव करिष्ये, यावदेतौ मां गभीरनिद्राम्मूढ़ं मन्येयाताम्

(नासिकागर्जनेन निद्रां नाटयति)

वनपालिका—(सभयं) अज्जउत्त, कुदो णु क्खु, एसो सूअलघोणासद्दो प्पसलदि, णत्थि एत्थ पुला को वि सूअलो दिट्ठो, ता किं णु क्खु एदं?

वनपाल:—एसो संसओ मं वि पज्जाउलं कलेदि, ता तुमं इध चिट्ठ जाव अहं पेक्खामि।

वनपालिका—मा क्खु! मा क्खु, सूअलो णाम पइदिपलुसा जादो, ता अलं तस्स समीवप्पट्ठाणेण, एहि उड्अं गच्छेह्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनपालः—भीलु, अलं आसङ्काए, अधवा आअच्छ तुमं वि सद्द ज्जेव, जाव सव्वं देक्खिस्ससि।

वनपालिका—एव्वं भोदु। (इत्युभौ विदूषकमभिसरतः)

वनपालः—अले ण क्खु एसो सूअलो, एसो को वि माणुसो पाट-वस्स तलट्ठाने णिद्दासुहं अणुहोदि,

वनपालिका—णं को णाम एसो भवे? अधवा अअं लाअ-पलिजणो त्ति णत्थि एत्थ सन्देहो।

वनपालः—पध पेक्खिअ किदणिच्चओ होमि।

(इति निपुणं वीक्षते)

विदू—(लब्धसंज्ञ इव) अरे को नाम एष महाराजनलस्य प्रियवयस्यं नानाविधभूषणप्रसाधितविग्रहं मामशब्दपदसञ्चारेण चोरयितु-मिच्छति? तिष्ठ रे जाल्म तिष्ठ (इत्युत्थाय वनपालं सासूयमिव पश्यन्) किन्नु खलु? त्वमेवंविधः सञ्जातोऽसि? धिक् भ्रान्तम्।

(मुखं परावर्त्तयति)

उभौ—प्पसीददु प्पसीददु अज्जो, ण क्खु अह्मे ईदिसस्स अकज्जस्स कालके। णिद्दं गदस्स अज्जस्स णासिआगज्जणं सुणिअ भीदेहिं अह्मेहिं णिच्चअं कादुं एव्वं अणुचिट्ठिदं त्ति।

विदू—अत्र कः प्रत्ययः?

वनपालः—अज्ज! एत्थ मे प्पमाणं भअवदीओ वणदेवदाओ, सम-केरअं हिअअं अ। को अण्णो एत्थ प्पमाणं भवे?

विदू—साधु, सम्यक् प्रमाणयसे मनःसत्त्वं, तदिदानीं त्वां निरपराधं सम्भावयामि, भ्रान्त्या युवयोराकृतिरपि निरपराधतामिव स्फोरयमनुभावयति।

वनपालः—अज्ज, अणुग्गहीदा अह्मे, ता जाव दाणिं आसादेदु अज्जो णिअं कज्जं अणुचिट्ठिदुं, अज्ज वि सावसेसो णिच्चव्वावारो।

वनपालिका—अज्ज वन्दामि, आणवेदु अज्जो, जाव गच्छह्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदू—श्रूयतां, अपि विज्ञायते, यथा अद्य केनापि विकारेण विमनायितो महाराजः स्वं मानसं निर्वर्त्तयितुं विलासोद्यानमिदं परिप्राप्त इति ?

उभौ—अज्ज, अधइं।

विदू—तदत्र तथा कञ्चित् प्रदेशं स्वच्छन्दसञ्चारं अपनीतजीर्ण-त्वणपत्रं निरूपय, ययास्य तत्र निषण्णस्य मलयवातमासेवमानस्य विकारोपशान्तिः सुलभा भवेत्।

वनपालः—अज्ज किं त्ति बहुलणिरूवणेण, रमणिज्जाइं सव्वाइं पदाइं एत्थ विलासोज्जाणे, तधा हि पेक्खदु भवं, एदे पुप्फफल-भारणमिदसिहरा रुक्खआ सव्वस्सिं ठाणे सोहन्ति, तधा सव्वदो वट्टन्ति सुधाधवलवण्णा सिलापट्टआ, एसा अ माहवीलदा पुप्फसोहा-रमणिज्जा सोहग्गं ज्जेव संसूचेदि भोइजणाणं। ता एदं ज्जेव तधा सुहपदं भवे।

विदू—अरे कुशलस्त्वं स्वेषु कृत्येषु, तदेतेन प्रचुरमेव राजप्रसाद-मर्हसि!

वनपालः—अज्ज, लाअप्पसादो मए सुचिलं ज्जेव भअवदो प्पसादेण अणुभविज्जदि।

विदू—इतोऽप्यधिकतरं लभस्वेति प्रार्थये।

वन—अज्ज! अणुग्गहीदा म्ह।

विदू—अथ त्वं परिजनैः साकं चिरमत्रैव तिष्ठसि ?

वन—भअवं, अधइं; जइ चिलं एत्थ ण चिट्ठेमि, तदो विलासो-ज्जाणं तिणेहिं परिकीण्णं जिण्णपत्तदुप्पवेसं सव्वधा अवट्ठाणे जोग्गत्तणं ज्जेव पलिच्चअदि साधालणाणं वि, का कधा लाअपदोव-जुत्ताणं भवादिसाणं।

विदू—अथ अत्र किं वस्तु भुञ्जाना यूयं जीवनयात्रां निष्पादयथ ?

वनपालः—अज्ज, किं णु क्खु एव्वं भवं पुच्छदि ? अवि एदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ण विसादं अज्जे ण, जधा अह्मे दसो भिक्खा वणइेशं रक्खिदुं।

विदू—तेन किं स्यात्?

वनपालः—तेण क्खु राअकोसादो लद्धेहिं अत्येहिं णिव्विग्घं जीवणं धारेह्म।

विदू—आः मूढ़! अत एव पृच्छसि, यदि तावदहमस्य विलासकाननस्य परिपालकपदमगमिष्यं तदा प्रतिवासरमेव तरुलताभ्यः प्रचुराणि फलानि सञ्चित्य दैवं कुक्षिगतं वैश्वानरं निरवापयिष्यम्। को नाम सुखोपनतामीदृशीं सम्पदं हेलया परित्यज्य आयासेषु पदं कुर्य्यात्?

वनपालः—अज्ज, मा एव्वं भण, विलासोज्जाणं एदं लाअकेलस्स, एत्थ उप्पसाइं सव्वाइं ज्जेव हव्वाइं लाआधिआलं अरिहन्ति, ता एत्थ उप्पसाणं फलाणं कधं अह्मेहिं उवभोओ? भट्टुणो अणणुमदीए गह्णेदेसुं भट्टुणो हव्वेसु चोलत्तणं उवगदं भवे, अदो ज्जेअ अह्मो ईदिसकज्जस्स ण कालके।

विदू—(स्वगतं) अहो नीचजातेरपि वनपालस्य साधुता! दुर्लभस्तावदेव विमलचारित्रो मानुषेषु, तदयं विजयते मम प्रियवयस्यस्य पवित्रो राज्याधिकारः। तथाहि अद्य तपोवनेषु निरुपद्रवाः सोमपीथिनो यज्ञीयहविःसौरभैः प्रियं कुर्व्वन्ति देवतानां, कालवर्षी पर्जन्यः समावर्जयति वसुन्धरां शस्यस्तम्बकैः, सर्वा एव प्रजाः सुखमनुभवन्ति पुरन्दरपुरनिवासिनेव निषधनिवासिन, नूनमहं भाग्यवतामग्रसरो भजनीयप्रभावस्य महाराजनलस्य वयस्यपदवीमध्यासीनः। अहो कीदृशं मया समाचरितं जन्मान्तरे पुण्यकर्म्म, यस्य तथाभूतमनुत्तमं फलमिदं समनुभूयते! नूनं सौभाग्यवती मे प्रियतमा भानुमती, या हि मामीदृशं सकालवसुन्धराधीश्वरस्य प्रियवयस्यं पतिपदे समुपलभ्य स्पृहणीयतामाश्रितवती निखिलानां नारीजनानां। भवतु, अलमनया चिन्तया, यावदिदानीं मङ्गलसंवादेन भूयोऽपि वनपालं संवादयामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रकाश) अरे, कथितं मे हृदयेन, समुचितमेव ब्रवीषीति, तदाशिष ते प्रयच्छामि, यथा एवं साधुभावं दधानः सुचिरं सपरिजनः सुख स्थेया इति ।　　　　(क्रमशः)

उपासना

(पूर्व्वतोऽनुवृत्ता)

लेखकः—श्रीशरत्कमलभट्टाचार्य्यन्यायस्मृतितीर्थः ।

तर्पणरूपायामुपासनायां विश्वात्मनो भगवत एव उपासनं न तावज्जड़ानामुपासनमिति "देवा यक्षा" इति मन्त्रतात्पर्य्यं प्रकाशयता प्राक् प्रतिपादितम् । "देवा यक्षा" इत्यनेन सामान्यतः सर्व्वभूततर्पणद्वारा सर्व्वभूतात्मकभगवदुपासनं विहितम्, साम्प्रतं विशेषभूततर्पणमुखेन विशेषभूतात्मकभगवत उपासनमाह—

"सनकश्च सनन्दश्च तृतीयश्च सनातनः !
कपिलश्चासुरिश्चैव वोढ़ुः पञ्चशिखस्तथा ।
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥"

"सनकादय ऋषय आदिमनुष्या ब्रह्मणो मानसपुत्राः प्रसिद्धाः; कपिलादयश्चादिविद्वांसः सांख्याचार्य्याः कीर्त्तिताः, अस्मद्दत्ततर्पणजलेन तेषां सर्व्वेषामेवाचया तृप्तिरस्तु"—इति पिण्डीकृतो मन्त्रार्थः ।

अत्रायं प्रश्नः पदं करोति—"देवा यक्षा" इति मन्त्रे "ये जीवा" इत्यनेन सर्व्वेषामेव तर्पणं सिद्धम्, कथं पुनः "सनकश्च" इत्यादिना सिद्धमपि तत् साधयति ? नहि जात्वपि लोकानां सिद्धसाधने प्रवृत्तिरुपलभ्यते ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोत्तरम्—यावत् सर्व्वेषु भूतेषु तद्भावो (भगवद्भावः) नोपजायते तावदुपासनं सर्व्वथा कर्त्तव्यमिति पूर्वं वर्णितम्। "देवा यक्षा" इति मन्त्रेण सामान्यात्मना सर्वभूतेषु भगवद्भावनात्मिका उपासनोपदिष्टा, "सनकश्च" इत्यादिना विशेषात्मना तादृशी उपासना उपदिष्टा इति निरवद्यम्। अत एव "सर्वं खल्विदं ब्रह्म"—इति सामान्यात्मना आम्नातमपि ब्रह्मस्वरूपं—"स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्। स एव विष्णुः स प्राणः सः कालाग्निः स चन्द्रमाः।" (१) "ब्रह्मेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण"(२) इत्यादिविशेषात्मना बहुधा पुनराम्नातम्। ततश्च एतदुक्तं भवति - येन खलु भगवता देवयक्षनागाद्यात्मकसामान्यभूतविग्रहवता भक्तिदत्तं मत्तर्पणजलं सानुग्रहं गृहीतम्, स एव सर्वशक्तिर्भगवान् सनकादिविशेषविग्रहवान् गृह्णन् दत्तमिदं जलं तृप्यतु—इति प्रार्थना।

इदमपि तात्पर्य्यान्तरं भवितुमर्हति—"देवा यक्षा" इति मन्त्रे मनुष्यनाम न परिश्रूयते तस्मादादिमनुष्याणां सनकादीनां तर्पणं पृथगभिहितम्। अत एव सनकादितर्पणं "मनुष्यतर्पण"मिति नाम्ना व्यवदिश्यते। वयं यतो मनुष्या अतः सर्वेषामस्माकमादिपुरुषा आदिमनुष्यास्तेन कथमस्माभिस्तर्पणीयाः? अन्यथा सर्वथैवाकृतज्ञताप‌द्येत। तथाहि येषां मनुष्यनामानुसारेणास्माकमद्यापि "मनुष्ये"ति नाम, यदि नामास्माकं तेषां नामास्मरणतामावहति तदा मनुष्यत्वहानिरप्युपजायेत, ततश्च येषां नाम्ना येषां ख्यातिस्तेषां नामस्मरणं तेषां सर्वदैव कर्त्तव्यमिति कृत्वापि प्रतिदिनं स्मरणार्थं तेषां तर्पणं पृथगभिहिततां लब्धुमर्हत्येव।

सनकादयो ब्रह्मणो मानसपुत्रा इत्युक्तं प्राक्। मानसपुत्रा इत्यस्य कोऽर्थः? तथाहि ब्रह्मणो ध्यानपूतान्मनसो जाता ये पुत्रास्ते तस्य (ब्रह्मणः) मानसपुत्राः। तथाच श्रीभागवते तृतीयस्कन्धीयद्वादशाध्यायवचनानि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत।
भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत्।
सनकञ्च सनन्दञ्च सनातनमथात्मभूः।
सनत्कुमारांश्च मुनीन् निष्क्रियानूर्द्ध्वरेतसः॥
तान् बभाषे स्वभूः पुत्रान् "प्रजाः सृजत पुत्रकाः।
तन्नैच्छन् मोक्षधर्म्माणो वासुदेवपरायणाः॥

"तस्य (सनकादेः) वासस्थानं जनलोक" इति काशीखण्डम्। एवञ्च निवृत्तिपथसमाश्रितानां परमज्ञानिनामूर्द्ध्वरेतसां (नैष्ठिकब्रह्मचारिणां) भगवत्परायणानां जनलोकनिवासिनां सनकादीनां तपश्च "ये जीवा" इति सामान्यालापना सिद्धमपि नैवरूपेण सिध्यतीति न पूर्वोक्ता सिद्धसाधनाशङ्का।

ये खलु सृष्टिसूर्त्तेर्भगवतो ध्यानादाविर्भूता ध्यानमयविग्रहाः सततपरब्रह्मयोजितचित्ता अचिरतं ब्रह्मण्येव परमे विचरन्ति, ब्रह्मप्रतीकभूतानां तेषां प्रतिदिनं स्वभक्तितर्पणं कीदृशमुपासनमिति सम्प्रति स्वतं एवागच्छति।

अत्रेदमपरं विभावनीयम्—मनुष्यशरीरं प्रति शुक्रशोणितादीनां कारणत्वादादिमनुष्याणां सनकादीनां शरीरं प्रति तादृशकारणताऽदर्शनात्तेषां तादृशशरीरकल्पना (ब्रह्मणो ध्यानपूतमनोजातशरीरकल्पना) न प्रमाणसिद्धेति न वक्तव्यम् परमर्षिकणादेन तादृशशङ्काया निराकृतत्वात्। तथाहि कणादसूत्राणि—

"धर्म्मविशेषाच्च"।

अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म्म, तेन कर्म्मणा सम्भूय परमाणवो द्व्यणुकादिप्रक्रमेण अयोनिजं देवर्षीणां शरीरमारभन्त इत्यर्थः।

"समाख्याभावाच्च"।

समाख्या अन्वर्था संज्ञा श्रुतिस्मृतीतिहासादिषु प्रसिद्धा। तथाहि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्वासःप्रभृतयो मानसा अहङ्कारेभ्यः, अङ्गारेभ्यः समभवदङ्गिरा इत्यादिका।

"संज्ञाया आदित्वात्"।

सर्गादौ या ब्रह्मादिसंज्ञा आदिभूता प्राथमिकतया ज्ञायते अस्ति अयोनिजं शरीरमिति, नहि तदा ब्रह्मणो मातापितरौ स्तः, याभ्यां ब्रह्मादिसंज्ञा कृता स्यादिति भावः।

"वेदलिङ्गाच्च"।

वेदो मन्त्रः, स लिङ्ग्यते ज्ञाप्यते अनेनेति वेदलिङ्गम्—ब्राह्मणम्। ततोऽप्ययोनिजं शरीरं प्रतिपद्यत इत्यर्थः। तथाहि ब्राह्मणम्—"प्रजापतिः प्रजा अनेका असृजत्, स तपोऽतप्यत प्रजाः सृजेयमिति, स मुखतो ब्राह्मणमसृजत्, बाहुभ्यां राजन्यमूरुभ्यां वैश्यम्, पद्भ्यां शूद्रम्"। वेदोऽपि "ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादि।

हेतुभूतपूर्वोक्तवैशेषिकसूत्रैः सप्रमाणतद्व्याख्यानवचनैः श्रुतिस्मृतीतिहासपुराणादिभिश्च सनकादीनामयोनिजं तादृशशरीरं प्रमाणसिद्धमेव न च काणादसूत्रस्याप्रामाण्यमाशङ्क्यं, तस्य परमर्षित्वात् (ऋषेर्दर्शनात्) "योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्। चक्रे वैशेषिकं शास्त्र-"मिति प्रशस्तपादाचार्यवचनाच्च। वेदस्य भगवदुच्चरिततयाऽपौरुषेयतया वा प्रामाण्यं सुप्रसिद्धमेव, तन्मूलकतया स्मृत्याद्यागमानामपि प्रमाणत्वमवगन्तव्यम्।

स्यादेतत्, साम्प्रतं प्रकृतमनुसरामः—"सनकश्च" इति मन्त्रे कपिलादीनामपि तर्पणं विहितम्। कपिलश्च सांख्यप्रवक्ता आदिविद्वान्। तथाहि श्वेताश्वतरमन्त्रः

"ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्त्ति जायमानञ्च पश्येत्।"

भगवानेव स्वयं करुणया कपिलरूपेणाविर्बभूवेति पौराणिकाः प्रवदन्ति। तथाच श्रीभागवते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"कपिलस्तत्त्वसंख्याता भगवानात्ममायया।
जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणाम्॥"

तथा तं (कपिलं) प्रति तन्मातुः (देवहूत्याः) उक्तिर्यथा—

"य आद्यो भगवान् पुंसामीश्वरो वै भवान् किल!
लोकस्य तमसान्धस्य चक्षुः सूर्य्य इवोदितः॥"

ततश्च कपिलतर्पणं साक्षाद्भगवत्तर्पणमेव। आसुरिप्रभृतयः सांख्याचार्य्याः। तथाच कारिका (ईश्वरकृष्णाचार्य्यकृता)—

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्॥

मुनिः कपिलः अनुकम्पया एतत् सांख्यशास्त्रमासुरये, आसुरिः पञ्चशिखायानुकम्पया प्रददौ, तेन शास्त्रमिदं बहुधा कृतमिति आसुरिप्रभृतीनां सांख्यसम्प्रदायप्रवर्त्तकत्वमायातम्। अत्रापि पूर्व्वोक्तदिशा कपिलादित्रिशिवविग्रहवतो भगवतस्तर्पणरूपमुपासनमवगन्तव्यम्।

(क्रमशः)

दुर्गेशनन्दिनी।

लेखकः—श्री........

अष्टादशः परिच्छेदः

कारामुक्तेन जगत्सिंहेन पितृकटके समुपस्थाय कृतः स्वप्रतिश्रुतिमनुसृत्य मोगलपाठानयोः सन्धिबन्धः। आसन् पाठाना दिल्लीश्वरस्य अधीश्वरत्वं स्वीकृत्यापि उत्कलदेशप्रभवः। सन्धेर्विस्तृतं विवरणमितिहासे वर्णनीयम्। अत्रालमतिविस्तरेण। सन्धिं समाप्य उभावेव कियन्ति दिनानि यथास्थानं तस्थतुः। नवप्रीतिसंवर्द्धनार्थञ्च कतलुखानस्य पुत्रान् समादाय प्रधानामात्यः खाजाईशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेनापतिरोसमानश्च महाराजस्य मानसिंहस्य शिविरमुपगतौ गजानां सार्द्धशतमपराणि च महार्घाणि द्रव्याणि उपहृत्य महाराजस्य परितोषमुत्पादयामासतुः। महाराजोऽपि तान् बहु समादृत्य सामन्तपदवीञ्च दत्त्वा विससर्ज। एवं सन्धिबन्धं समापयतां शिविरभङ्गोद्यमञ्च कुर्व्वतां तेषां कतिचन दिवसा गताः।

अथ समागते राजपुत्रसेनायाः पाटलिपुत्रगमनसमये जगत्सिंह एकदा ससहचरः पाठानदुर्गमाजगाम आप्रष्टुम् ओसमानादीन्। कारागृहसमागमादनन्तरं न पुनः प्रकाशितं सौहार्द्दम् ओसमानेन राजपुत्रं प्रति। अद्य तावत् स्वल्पमेव सम्भाष्य तं विससर्ज। सखेदमामन्त्र्य ओसमानं जगत्सिंहः खाजा-ईशम् आप्रष्टुं गतः। ततोऽपि आमन्त्रणाभिलाष एव आयेषामभि प्रस्थितः। तत्र केनचित् अवरोधरक्षिणा प्रेषितः सन्देशः सविधे आयेषायाः। रक्षी च राजपुत्रेण एवमुपदिष्टः "कथय ताम्। न जातं तया सह दर्शनं परलोकगमनादनन्तरं नवाबस्य! अधुना गच्छति मया पाटलिपुत्रम्। पुनर्दर्शनसम्भावनापि विरला एव। अत इच्छामि तामभिवाद्य गन्तुम्।"

वर्षवरः क्षणान्तरे प्रत्यागम्य प्रोवाच नवाबनन्दिनी सन्दिष्टवती 'सा युवराजेन सह न करिष्यति साक्षात्कारम्। अपराधश्चैष मार्ज्जनीयं इति।

संवर्द्धितविषादो राजपुत्रः स्वशिविरं प्रति प्रस्थितः। दुर्गद्वारे दृष्टस्तेन प्रतीक्षमाण ओसमान। ओसमानस्तु पुनरपि अभिवाद्य गच्छन्तं राजपुत्रम् अनुससार। राजपुत्रः समभाषत सेनापते, प्रकाशयतु भवान् यदि कश्चिद्वर्त्तते भवदादेशः। कृतार्थो भवाम्यहं तं प्रतिपाल्य।

ओसमानः प्रत्युवाच—वर्त्तते वचनविशेषो भवता सह। न वक्तुं शक्नोमि सहचरसमक्षम्। आदिश्यन्तां परिजना अग्रसरणाय। आगच्छतु च एकाकी मया सह।

राजपुत्रः विकल्पमकृत्वैव सहचरान् अग्रगमनाय आदिश्य एकाकी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठानेन सह चलितः। ओसमानोपि अश्वमानाय्य आरूढ़ः। कियद्दूरं गत्वा ओसमानो राजपुत्रेण सह निविड़काननाभ्यन्तरं प्रविष्टः। आसीत् तत्र वनमध्ये काचित् भग्ना अट्टालिका। तन्मध्ये पुरा कश्चित् राजद्रोही अनागत्य काननाभ्यन्तरे आसीत् लुक्कायितः। शालवृक्षे अश्वं बद्ध्वा ओसमानो नीतवान् राजपुत्रं तदट्टालिकामध्यम्। मानवविहीना सा अट्टालिका। अन्तरा आयतं प्राङ्गनम्। तस्य एकतो वर्त्तते एकं यावनं समाधिस्थानम्। अन्यतश्च काचित् सज्जिता चिता। न विद्यते तत्र कश्चित् शवः। प्राङ्गनमध्यमागत्य राजपुत्रः पप्रच्छ—किमेतत् ?

ओसमानः प्रत्युवाच—ममाज्ञया एव अनुष्ठितमेतत् सर्व्वम्। अद्य मम चेन्मरणम् भवेत्, तदा भवान् मामत्र समाधिमध्ये स्थापयिष्यति। न कोपि तत् ज्ञास्यति। भवतश्चेत् प्राणत्यागो भवति तदा चितायामस्यां ब्राह्मणैर्भवतोऽन्त्येष्टिक्रियां कारयिष्यामि। नान्यः कोपि तदवगमिष्यति।

विस्मितो राजपुत्रः पप्रच्छ—कः खलु गूढ़ार्थं एतद्वाक्यजातस्य। ओसमानः समभाषत वयं पाठानाः। प्रज्वलिते अन्तःकरणे औचित्यमनौचित्यं वा न गणयामः। अस्मिन् जगति न विद्यते आवयोरुभयोः प्रणयाकाङ्क्षिद्वयस्य स्थानम्। एकतरः खलु आवयोरत्र प्राणान् त्यक्ष्यति।

राजपुत्रो विज्ञाय सर्व्वमतीव क्षुब्धः सञ्जातः। उवाच च—किमभिप्रायः सम्प्रति भवान् ?

ओसमानः प्रत्युवाच—सशस्त्र एव वर्त्तसे त्वम्। युध्यस्व मया सह, यद्यस्ति शक्तिश्चेत् वर्त्तते मां हत्वा स्वकीयं पन्थानं मोचय। नोचेत् मम हस्ते प्राणान् सन्त्यज्य मुञ्च मम पन्थानम्।

एवमुक्त्वा ओसमानः प्रत्युत्तरावसरमदत्त्वैव जगत्सिंहाय, असिहस्तस्तमाचक्राम। राजपुत्रश्च आत्मरक्षार्थं द्राक् कोषादसिं निष्क्रम्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओसमानकृतघातानां प्रतिघातमकार्षीत्। कृतश्च ओसमानेन पुनः पुनर्महान् उद्यमो राजपुत्रस्य प्राणनाशाय। राजपुत्रो भ्रमेणापि ओसमानमाहन्तुं नाचेष्टत। केवलमात्मरक्षणपर एव अवातिष्ठत। उभावेव शस्त्रनिपुणौ। सुचिरमभूत् युद्धम्। परं कोपि न कमपि शशाक पराजेतुम्। यवनस्य अस्त्राघातेन राजपुत्रस्य शरीरं विक्षतमभूत्। अङ्गानि शोणितार्द्राणि जातानि। ओसमानं स सकृदपि न आजघान। रुधिरस्रावेण शरीरमवसन्नमवलोक्य ईदृशे संग्रामे मरणं निश्चितञ्च बुद्ध्वा जगत्सिंहः कातरस्वरेण प्रोवाच—विरम्यतामोसमान। मया तु स्वीक्रियते पराभवः। ओसमान उच्चैर्विहस्याब्रवीत्—ज्ञातपूर्व्वं मया राजपुत्रा मरणभीता इति। युध्यस्व, त्वामहं हनिष्यामि। न खलु क्षमिष्ये। जीवति त्वयि नाहमधिगमिष्यामि आयेशाम्।

राजपुत्रः प्रोवाच नाहमायेशाभिलाषी।

ओसमानः खड्गं घूर्णयन्नुवाच न खलु त्वमायेशाभिलाषी। परम् आयेषा त्वदभिलाषिणी। युध्यताम्। न वर्त्तते क्षमा।

राजपुत्रो दूरे खड्गं निक्षिप्यावदत्—नाहं योत्स्ये।

ओसमानः सक्रोधं राजपुत्रं पदेनाहत्य अभाषत यः खलु योधः बिभेति युद्धात्, एवं तेन योधयामि।

लुप्तं राजपुत्रस्य धैर्य्यम्। त्वरितहस्तः स भूमितः खड्गमुत्थाप्य शृगालदष्टः सिंह इव सरभसमुत्पत्य यवनमाचक्राम। न खलु यवनः सोढुं शक्तस्तं प्रहारम्। स राजपुत्रस्य खड्गाघातेन भूमौ पपात। राजपुत्रस्तस्य वक्षसि आरुह्य हस्तादसिम् उज्जग्राह। स्वकरस्थं प्रहरणं च तस्य गलदेशे संस्थाप्य अभाषत किं निवृत्तः समराभिलाषः?

ओसमानः प्रत्यभाषत—न खलु जीवतो मम।

राजपुत्रः प्रोवाच—क्रियताम् तथा। न चेत् जीविष्यति त्वां जिघांसुः शत्रुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगत्सिंहोऽभाषत—तिष्ठतु नाम ! न खलु तेन बिभेति राजपुत्रः। प्राणांस्ते हन्याम्। परं रक्षितास्त्वया मे प्राणाः। मयापि रक्ष्यन्ते तव।

एवमुक्त्वा बद्धपाणिपादस्य तस्य शरीरात् अस्त्राणि एकैकशो जग्राह।

ततस्तं मोचयित्वावदत्—गम्यतामधुना निर्विघ्नं गृहं प्रति। यवनेन त्वया राजपुत्रस्य शरीरे कृतः पादाघातः। अत एव कृता ते इयमवस्था। न चेद्राजपुत्रा नैवं कृतघ्नाः यदुपकारिणः शरीरं स्पृशेयुरिति।

मुक्त ओसमानोऽनुक्त्वा वचनान्तरं अश्वमारुह्य सपदि दुर्गं प्रति द्रुतं प्रतस्थे। राजपुत्रो वस्त्रेण प्राङ्गनस्थात् कूपात् जलमुद्धृत्य गात्रमधावीत्। गात्रं प्रक्षाल्य शालवृक्षादश्वं मोचयित्वा समारूढः। अश्वारूढेन तेन दृष्टा अश्वस्य प्रग्रहे लतावद्धा कापि पत्रिका। प्रग्रहात् पत्रमुन्मोच्य दृष्टं तत्र बन्धनं मानवकेशरचितम्। उपरि च विद्यते लिखितं दिवसद्वयेन नोन्मोचनीयमेतत्—अन्यथा अस्य आशयो विफलतां गमिष्यतीति।

राजपुत्रः क्षणं विचिन्त्य लेखकस्य आशय एव प्रतिपालनीय इति अवधारयामास। पत्रं कवचमध्ये संस्थाप्य स शिविरमभि अश्वं चालयामास।

राजपुत्रः शिविरं प्राप्य द्वितीयं पत्रमेकं दूतहस्तात् समधिजगाम। लिपिरेषा आयेषया प्रेषिता। तद्वृत्तान्तस्य परवर्त्तिनि परिच्छेदे एव वक्तव्यः।

जनविंशः परिच्छेदः

आयेषाया लेखः

लेखनीहस्ता आयेषा पत्रलेखनव्यापृता बभूव। मुखच्छाया तस्या अतीव गम्भीरा स्थिरा च। जगत्सिंहस्य प्रेष्यते सन्देशः। लेखपत्रम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकमादाय सा तत्र लेखितुमारब्धा। पूर्वं तावत् लिखितं प्राणाधिक इति सम्बोधनम्। तदैव तदपनीय निवेशयामास राजकुमार इति। प्राणाधिकशब्दं विलोप्य राजकुमारशब्दारोपणे तस्या नयनविगलिता अश्रुधारा पपात लेखमध्ये। अतः सा चिच्छेद तत् लेखपत्रम्। पुनरपि सा अन्यस्मिन् पत्रे लेखमारोपयितुं प्रचक्रमे। परं कथं कथमपि लिखितेषु पङ्क्तिकतिपयेषु भूयोऽपि पत्रम् तज्जातम् अश्रुकलङ्कितम्। सापि लिपिर्विलोपं नीता। अथ समाप्य कामपि अश्रुचिह्नशून्यां पत्रिकां तां पठन्त्यास्तस्या नयनवाष्पेण दर्शनशक्तिलोपः समजनि। कथमपि सा तां लिपिकोषे निवेश्य दूतहस्ते प्रायच्छत्। दूतश्च लिपिमादाय राजपुत्रशिविरं प्रति प्रतस्थे। आयेषा च एकाकिनी पर्यङ्कलीना रोदनरता बभूव। जगत्सिंहः समधिगम्य पत्रिकामिमां वाचयति स्म।

राजकुमार,

नाहमात्मधैर्य्यं प्रति अपगतविश्वासा,—यन्मया न कृतं दर्शनं भवतः। न तावत् मन्यताम् आयेषा अधीरा इति। ज्वालितः स्वकीये हृदयमध्ये अग्निरीममानेन। कृते भवतसन्दर्शने यदि नाम स क्लेशमधिगच्छेदिति न कृतं दर्शनं भवतः। नाहमाशंसे, अजाते सन्दर्शने क्लेशः समधिगन्तव्यो भवता इति। स्वकीयः क्लेशः सुखदुःखे सर्व्वं भगवतश्चरणे एव समर्पितम्। यदि नाम समक्षमेव भवन्तम् आपृच्छे, तदापि तं क्लेशं अनायासमेव असहिष्ये। भवद्दर्शनक्लेशमपि पाषाणमयीव सहे।

तदा कथं लिखति एषा लिपिरिति? वर्त्तते काचिन्भिक्षा। तदर्थमेव प्रेष्यते एषा पत्रिका। यदि तावत् श्रुतं भवता, त्वयि बद्धानुरागा अहमिति तदा विस्मर्य्यतां तत्। आसीत् मे सङ्कल्पो यावज्जीवमेतन्न प्रकाशयिष्यामीति। विधातुरिच्छया प्रकाशतां गतमेतत्। इदानीं विस्मर माम्। नाहं तव प्रेमाकाङ्क्षिणी। दत्तं मया यदेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाहं याचे तस्य प्रतिदानम्। तथा बद्धमूला मे प्रीतिर्यया अकृतेऽपि भवता स्नेहे अहं सुखिता एव स्थास्यामि। परमलम् अनेन वचसा।

दृष्टो मया भवान् असुखितः। यदि कदापि अधिगम्यते सुखं तदा स्मरणीयाहं सन्देशप्रेरणेन। न चेत् रोचते भवते अलं सन्देशेन। यदि कदाप्यनुभूयते चित्ते क्लेशसञ्चारस्तदा किं न स्मरणीया आयेषा?

यन्मया लिखति एष लेखो, लिखिष्यते वा अन्यच्च तज्जनैर्वचनीयम्। पापरहिताहं न तत्र पश्यामि कमपि दोषम्। यदा रोचते पत्रं प्रेषणीयम्।

त्वमधुना देशमेतं परित्यज्य गच्छसि। नैते पाठानाः प्रियशान्तिकाः। अतः सम्भवति पुनरपि भवतोऽत्रागमनम्। पुनर्न भविष्यति तदा मया सह दर्शनम्। पुनः पुनर्विचिन्त्य एवं मया स्थिरीकृतम्। दुर्दमनीयत्वात् रमणीहृदयस्य अनुचितं साहसाधिक्यम्।

मत्कृत्वा भवद्दर्शनाभिलाषिणी एषा। यदि नाम क्रियते भवता परिणयोऽत्र प्रदेशे तदा विज्ञापनीय एष जनः। विवाहसमये समुपस्थाय सम्पादनीयं मया शुभकार्य्यम्। या खलु भविष्यति भवतो महिषी तदर्थं संगृहीतम् अलङ्कारजातम्। अधिगते अवसरे स्वहस्तेनैव नियोजयिष्यामि तदङ्गेषु।

पुनरपि प्रार्थये—आगस्यतां तदैकदा यदा आयेषायाः मरणवार्त्ता प्राप्स्यते भवता। भवदर्थं करङ्कमध्ये यत् स्थाप्यते तत् तदा ममानुरोधेन कृपया ग्रहीतव्यम्। किमन्यत् लेखिष्यामि। इच्छामि बहून्येव वाक्यानि लेखितुम्। परमलमनेन। जगदीश्वरस्तव सुखं विदध्यात्। आयेषां संस्मृत्य कदापि दुःखं मा गमः।

जगत्सिंहः पत्रिकां पठित्वा सुचिरं कटकमध्ये पद्महस्तः पद्मां विचचार। पश्चात् सहसा त्वरमाणो लेखपत्रमादाय एवं विलिख्य दूतहस्ते विससर्ज।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं भो रमणीरत्नम्। जगत्यस्मिन् मनःपीड़ेव मन्ये विधातुर्विधानम्। न दीयते प्रत्युत्तरं तव लेखस्य। अनेन कातरतां गतोऽस्मि। अस्य सम्भवति यदुत्तरं तदधुना न शक्यते दातुं। न तावत् विस्मर्य्यतामयं जनः। यदि जीवामि, वर्षात् ऊर्द्धं दास्याम्यस्य प्रत्युत्तरम्।

दूत इदं प्रत्युत्तरमादाय आयेषामभिप्रस्थितः।

(क्रमशः)

अभिनन्दनम्।

विगते सौरमाघस्य सप्तमे दिवसे सोमवारे सायं पञ्चमघटिकायां वङ्गीयशिक्षाविभागाध्यक्षाणां श्रीमतां हौर्णेल महोदयानां (W. W. Hornell, D. P. I., Bengal) भारतवर्षतः प्रस्थानमुपलक्ष्य समाहूता परिषद्गृहे कापि महती सभा, यत्र बहव एव मनीषिणः समवेताः सभायाः गौरवातिरेकं जनयामासुः। तत्र श्रीमता क्षितीश-चन्द्रचक्रवर्त्ति (एम, ए; बि, एल) महोदयेन कृते सभापतिवरण-प्रस्तावे समर्थिते च तस्मिन् अध्यापकश्रीयुक्तभागवतकुमारशास्त्रि-(एम, ए) महोदयेन, श्रीमता अध्यापकप्रवरेण देवदत्तरामकृष्णभाण्डारकारमहोदयेन अलङ्कृतं सभापतेरासनम्। ततश्च सभापतिमहोदयेन या नाम प्रदत्ता भावगरीयसी काचन वक्तृता तस्याः संस्कृतानुवादोऽधस्तात् अस्माभिः सारतः प्रदीयते।

"वङ्गीयशिक्षाविभागाध्यक्षाय श्रीमते हर्णेलमहोदयाय प्रशस्ति-पत्रप्रदानरूपं किमपि दुःखप्रचुरं कृत्यं निष्पादयितुं समवेता वयमत्राद्य सायम्। शिक्षाविस्तारः, सुशिक्षा, शिक्षासौलभ्यविधानञ्च तत्येषासोदस्य कृत्यशैली, या नामातभवतो महोदयस्य न केवलं शिक्षाधिपत्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि तु नीतिज्ञानवत्त्वमपि प्रकटयति। महत्या ज्ञानवत्तया सार्द्ध-मेतस्मिन् महात्मनि वरीवर्त्ति किमपि दूरदर्शनमतुलम्। तथा चैतदेवात्र भवतः शिक्षाधिपतिभ्योऽन्येभ्यः शिक्षानीतिवेदिभ्यश्च प्रायशः व्यावर्त्तको धर्म्मः। शिक्षाध्यक्षेषु केवलं मुम्बयीविभागीयशिक्षाध्यक्षचरहावार्ड महोदय एव (Mr. Howard— D P. I Bombay) अस्य तुलामधिरोढ़ुमलमभूत्, शिक्षानीतिवेदिषु च सार् आशुतोष मुखोपाध्याय एव अनेन तुलयितुं पार्य्यते महात्मा येन च साकमासीदस्य सौहार्दम्। एतयोरेव महात्मनोः समुपस्थितिरेकमत्यञ्च वङ्गानामिदानीन्तनसमुन्नतेर्मुख्यं कारणम्। होर्णलमहोदयानाञ्च नीतिविद्धुरीणानां कर्म्मपद्धतिः वङ्गीयानामुपकारोन्मुखी न तु अन्येषां कर्म्माधिकृतानामिव राजनैतिकनीतिसङ्कुलासीदिति तैर्महात्मभिरेव शिक्षाविभागीयकर्म्माधिकृतेषु यथा भारतीयानामपि स्थानं बाहुल्येन भवेत् तथा महान् एव प्रयत्नोऽङ्गीकृतः। तथा च स्मरणपथमापतन्ति नः प्रेसिडेन्सिविद्यालये अन्यत्र च अध्यापकवर्य्यनियोगाः। शिक्षासु नास्ति सा शाखा शिक्षाविभागीयाध्यक्षरूपेण या नाम तेन नानुशीलिता। तथा च नैतच्चित्रं यत्तेन प्राच्यशिक्षायामनुरागातिरेकात् तस्याः समुन्नतये अङ्गीकृतास्तेन अखिला प्रयत्नपरम्पराः। ये तावत् तेन सार्द्धं विस्रब्धं मिलिताः, शृणुम तेभ्यो यथा न केवलं तेन विशुद्धया वङ्गभाषया आलपितुमेव पार्य्यते निर्बाधं परं वङ्किमचन्द्रस्य आख्यानादिकमपि तेन सवक्रोक्तिकमेवावबुध्यते, यासां नाम वक्रोक्तीनामवबोधे वङ्गीयचरित्रस्य निपुणं ज्ञानम् अतितरामेवावहति प्रयोजनम्। एवं स्थिते वस्तुनि यत्तेन पालिसंस्कृतशास्त्राणां समुन्नतिविधौ समुत्साहः प्रदत्तस्तत्तु स्वाभाविकमेव। इयमपि नः परिषत् तेषान्तिके कनेव प्रतीयमानापि तदीयस्नेहार्थ साहाय्यादिलाभे समर्था समजायत। कियन्तञ्चेदधिकं कालं तेनात्रावास्यास्यत निश्चितमेव सर्व्वेषामेवास्माकं धारणोपयोगिगृहनिर्म्माणादिसाधकोऽपि अर्थस्तेनादास्यत। इदानीञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेषामेवात्रोपस्थितानां प्रत्यक्षमेवेदं यथा स्थानस्याल्पतया कृच्छ्रेणैव नोऽत्र स्थानं सम्भवतीहेति । परमाशास्महेऽस्माभिर्यथा तत्पदाभिषिक्तेन अभावोऽयं नः सदयं दूरीकरिष्यते निश्चितम् ।

यदत्रभवतां हार्णेलमहोदयानां परिषदं प्रति प्रीतिरकपटेति तत्र इतो महत्तरैश्च सभादिभिः पुरुषवरैश्चास्य सत्यपि निमन्त्रणे असंख्ये यदद्य तेन परिषदो निमन्त्रणं सादरमङ्गीकृतं तदप्यन्यतमं प्रमाणम् । परं भो महात्मानः, एतद् अपि वक्तव्यं यथा भवत्सु अस्मदीया प्रीतिः सारल्येन प्रगाढ़तया अन्यदीयापेक्षयाधिकतरेति । स्वकीयशिष्टतया सर्व्वेषामेव प्रीतिः समाकृष्टा भवता । यैर्नाम क्वापि टाउलपत्रिकाधिकृतैः केषाम् अपि आङ्गलदेशवासिनां नोद्घष्यते प्रशंसावादस्तैरपि निर्बाधं भवतां कृता प्रशंसा तदेव सूचयति औदार्य्यं माहात्म्यञ्च यन्नाम सर्व्वमेव विरोधं विद्वेषञ्च स्ववशमापादयति ।

अतश्च शिक्षाव्यापारस्य इदानीन्तनायां दुर्गतौ, प्राच्यविद्यायाः सम्भाव्यमानविपत्पातसमये, भवतां साहाय्यमन्तरेण च आशुतोषमहोदयैः कर्त्तव्ये विरोधिभिः सह संग्रामे भवतामितः प्रस्थानं सर्व्वैरेव निखिलभारतवर्षेषु विपत्पातस्वरूपतोऽवधार्य्यते ।

यच्च पुनर्वङ्गानामतीवानिष्टं स एव च चीनानां निश्चितमेव महान् लाभः, यत इदानीं प्राच्यदेशानां नवीनजीवनसञ्चारणार्थं जगतां समुन्नतये कर्म्मप्रवृत्तिजननार्थं च भवन्त इव गभीरज्ञाना अपेक्ष्यन्ते पाश्चात्त्याः । आशास्महे सागहमेवास्माभिर्यथा भवत्पदाभिषिक्ते भवदीयगुणाः संक्रान्ताः सन्त तमपि भवदनुसृतरीतिपरिपालनाय प्राच्यज्ञानस्य (विशेषतश्च भारतीयज्ञानस्य) गौरवमसुपलब्धये तथा पाश्चात्त्यशिक्षणीयवस्तुभिस्तस्य साम्यापादनाय उपयोगिनं विधास्यन्तीति । ”

अवसितायां सभापतिमहोदयानां वक्तृतायां कलिकाताविश्वविद्यालयोपाध्यक्षचर सार श्रीयुक्त देवप्रसादसर्वाधिकारिसूरिरत्न-श्रीयुक्त दुर्गाचरणसांख्यवेदान्ततीर्थ श्रीयुक्तप्रियनाथविद्याभूषणमहोदयैः हार्णेल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयानां गुणावलीवर्णनपुरःसरमार्चिता काचन मनोरमा वक्तृताः। अथ परिषदस्यतमसम्पादकेन श्रीमता पशुपतिनाथशास्त्रि-महोदयेन वाचिता हौर्णेलमहोदयानां भारतपरित्यागमुपलक्ष्य विरचिता संस्कृतसाहित्यपरिषदः प्रशस्तिः भूर्ज्जपत्रोपरि मुद्रिता कौशेय-वसनसंयुक्ता चन्दनकाष्ठपेटिकानिहिता सभापतिमहोदयैरुपहृता हौर्णेलमहोदयेभ्यः।

वङ्गीयशिक्षाविभागाध्यक्षाणां

श्रीमतां डब्लु डब्लु हर्णेल एम् ए सि आइ इ महोदयानां

भारत परित्यागावसरे

संस्कृतसाहित्यपरिषदः प्रशस्तिः

A Farewell Address

TO

W. W. Hornell Esq M. A., C. I. E.,

Director of Public Instruction, Bengal.

BY

The Sanskrit Sahitya Parishat, Calcutta.

शिक्षाधिनायपदवीं समुपेत्य धीमान्
वङ्गेषु कीर्त्तिमतुलां परितो व्यतानीत्।
स्वैर्भानुभिः किल तुषारकरः समन्ताद्
आलोकराशिमभिवर्षति तन्न चित्रम्॥

As by the Lunar Orb, its silv'ry
beams are spread,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Thy fair fame doth, O learned Sage,
all quarters pervade.

सौजन्यसङ्गतभवद्व्यवहारलाभात्
सर्व्वेऽत्र पण्डितजना: सुखसिन्धुमग्ना: ।
मन्दाकिनीकनकपङ्कजगन्धबन्धः
कं वा न नन्दयति मन्दिरमाश्रिताणाम् ॥

Charmed at thy suave portment
the lettered country is,
As by the odour of lotus-illumined
River of Paradise.

पुष्टा भवत्करुणया परिषद् विनीता
सम्माननां वितनुते भवत: कृतज्ञा ।
नीराभिषिकपरिवर्द्धितवृक्षराजी
धत्ते फलं गृहपतिभ्य इति स्वभाव: ॥

Thy love-foster'd Parishat pays
to thee its grateful homage,
As doth a plant yeild to him
that waters it, full fruitage.

यत्रैव ते गमनमस्तु तत: प्रदेशात्
सञ्चार्य्यतां स्मृतिपथे परिषत् प्रिया ते ।
दूरान्तरीचशयनोऽपि सहस्ररश्मि:
पङ्केरुहेषु महसा दिशति प्रकाशम् ॥

Where'er thou art, be thy belov'd
Parishat from thy mind, no exile,
Even as the sun cheers the lotus
from many a separating mile.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पन्थाः शिवोऽस्तु तव गम्यपदे च कीर्त्ति-
स्तत्रापि लोकहृदयेषु तनु प्रभावम्।
आशास्यते किमथवा नियतं किलेदं
स्वीया गुणाः प्रतिभुवस्तव सन्ति यस्मात्॥

In thy different station, fame and popularity—
as doubtless thy merits warrant—
Be thy meed, and may Fortune
her every gift to thee, lavishly grant.

मुग्धा गुणैस्तव चिरं परिषद्विनीता
किं वा करोतु परितोषकृते सुदीना।
संयाचते ननु परेशपदोपकण्ठे
दीर्घायुरेधि, सुखसम्पदिहास्तु पूर्णा॥

With what may thee
this poor Parishat, greet ?
Be thy life one long stream
of bliss infinite.

तदनन्तरञ्च होर्णलमहोदयैः संस्कृतसाहित्यपरिषत्कृतं तदीयसम्माननं साग्रहमभिनन्द्य या नाम कृता वक्तृता ललितभावमनोहरा तस्याः सानुवादान् अंशानुद्धरामः।

"I have always felt interested in the Sanskrit Sahitya Parishat. Institutions of the type of this Parishat where education is imparted in the old style are essential for the uplift of India. ... ... I am glad to think that I have been able to render some small assistance to this Parishat. I trust that my successor will take as much interest as or more than

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

what I took for this Institution If there were more genuine culture Bengal would be a happier country I wish the Parishat every success"

अस्य भावः - "संस्कृतसाहित्यपरिषदो हितं मम चिराभिलषितम्। एवंविधानि प्रतिष्ठानानि भारते, मम तत्रेऽपेक्षितानि यत्र प्राचीनरीत्या शिक्षा वितीर्य्यते। मया अस्याः कृते किञ्चित् साहाय्यकं कर्त्तुं पारितमिति विचिन्त्य आनन्दोऽनुभूयते। मम यावान् अनुरागोऽस्यामासीत् मम उत्तराधिकारिणस्तावान् तदपेक्षया अधिको वा भविष्यतीति सम्भावयामि। यदि सुशिक्षाया एवम्भूतानि केन्द्राणि वङ्गेषु अधिकानि भवेयुस्तदा वङ्गानां सौख्यं वर्द्धेत। परिषदः सर्व्वथा समुन्नतिराशास्यते मया।"

सभापतिवक्तृतावसाने परिषन्निर्म्मिते एव रङ्गे परिषत्सदस्यैः प्रयुक्तं महाकवेर्भासस्य कृतिरूरुभङ्गनामकं रूपकम् यन्नाट्यप्रयोगं प्रत्यक्षीकुर्व्वाणाः सामाजिकाश्चित्रार्पिता इव व्यभाव्यन्त। प्रयोगावसाने वङ्गीयव्यवस्थापकसभासदस्यैः श्रीमद्भिर्यतीन्द्रनाथवसुमहोदयैः कीर्त्तिते सभापतिसाधुवादे समाप्तमगात् सभाकृत्यमखिलमिति शम्।

कलिकाता-राजकीय-संस्कृतमहाविद्यालये

शताब्दी-महोत्सवः।

विदितमस्तु पारिषदमुख्यानां यद् विगतसौरमाघस्य षोड़शदिने बुधवासरे सायं चतुर्थघटिकायां सुसम्पन्नस्तावत् राजकीयसंस्कृतविद्यालयस्य शतवार्षिकोत्सवः। शतवर्षं यावत् अयं विद्यालयः खलु सर्व्वेभ्य एव विद्यालयेभ्यः संस्कृतशिक्षाप्रचारादिनानाहितकरकार्य्यनिकरैः आत्मनो वैशिष्ट्यं विशेषेण प्रकटयन् वर्त्तते। तस्यैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयस्य एवंविधे उत्सवे समुत्सुका एव वयं तत्र गतवन्तः! पत्र-पुष्पपताकाराजिभिः सुशोभितोऽभूत् प्रासादवरो महोत्सवेऽस्मिन्। वङ्गेश्वरः श्रीमान् लिटनमहोदय एवात्र कर्म्मणि सभापतेः पद मलमकरोत्। प्रारम्भे एव उत्सवस्य अभ्यर्थिता सभापतिमुख्याः ब्राह्मणमाणवकैर्गीतेन सङ्गीतेन श्रीमत्कृष्णकमलभट्टाचार्य्यप्रमुखैः प्रदत्तेनार्घ्यवारिणा च। ततो गीतन्तावत् सतानलयं स्वागतसङ्गीतं श्रीमन्महामहोपाध्यायगणनाथसेनवरेण सुरचितम्। श्रीमदाशुतोष-शास्त्रिपादास्तदनन्तरं स्वकीयमनोरमभाषाशैलीनिबद्धां भावग्रन्थियुतां श्लोकमालां सादरं प्रदत्तवन्तोऽभ्यागतजनेभ्यः। अवसिते तावत् पूर्व्व-कृत्ये अधीतं तावत् शतवार्षिकविवरणमध्यक्षमहाशयैः। ततः श्रीमन्तो वङ्गेश्वराः समवेतान् सामाजिकानाहूय स्वाभिभाषणं पठित-वन्तः। ततोऽनुष्ठितं सभापतीनां धन्यवादः सभ्यानां तृप्तये च कश्चित् भोजनव्यापारः। ततः सादरमामन्त्रितैः परिषत्सदस्यैः अभिनीतं तावत् भासकवेर्मध्यमव्यायोगरूपकम्। श्रीमद्वङ्गेश्वरा अपि सामोद-मान्तं प्रयोगदर्शनचातुर्य्येण सन्तुष्टा अभवन्। ततो रात्रौ समा-गतायां चलच्चित्रप्रदर्शनेन सह उत्सवस्य समाप्तिर्जाता।

कलिकाता-राजकीय-संस्कृतविद्यामन्दिरस्य शतवर्षसमाप्तिमहोत्सवे

स्वागतसंगीतकम्

(सं १९८० माघकृष्णदशमशाम्)

स्वागतमतिथिवराणाम्। (सुदिने)

राजप्रतिनिधि-लाट-लिटन-रविकिरणोत्फुल्लमुखानाम्॥

शुभशतवर्ष समापननन्दितपण्डितवन्दितचरणाम्।

को न नमति निजमन्दिरमहितां वाणीं बुधजनशरणाम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदचतुष्टयमन्त्ररचिता
भारतरामायणनिधिसहिता
जीवति न मृता त्रिभुवनभाषाजननी भाषा सुधियाम्।
कपिल-पतञ्जलि-कणाद-गौतम-जैमिनि-मुनिमुख्यानाम्॥
माघभारविकालिदासकविहर्षवाणप्रमुखानाम्।
अमरकवीनाममरा वाणी पूजां भजतु नृपाणाम्॥

(महामहोपाध्यायगणनाथसेनरचितम्।)

(लेखकः श्रीआशुतोषशास्त्री राजकीयसंस्कृतकलेजाध्यक्षः)

वेदध्वनिप्रतिनिनादनदत्प्रकोष्ठा
षड्दर्शनेन्दुविमलद्युतिनिस्तमस्का।
काव्यप्रसूनसुरभीकृतदिग्विभागा
माताऽद्य नो जयतु संस्कृतपाठशाला॥ १॥
धर्म्मार्थशास्त्रपरिशीलनशुद्धबुद्धीन्
विद्यार्थिनोऽमृतरसस्रुति पाययन्ती।
स्तन्यं प्रबोधमयमङ्कमुपानयन्ती
माताऽद्य नो जयतु संस्कृतपाठशाला॥ २॥
आस्ते शतायुरपि या कमनीयकान्ति-
स्तारुण्यभावविलसत्सविलासहासा।
भासा दिशः स्वयशसो दश भासयन्ती
माताऽद्य सा जयतु संस्कृतपाठशाला॥ ३॥
दोर्दण्डशासनवशीकृतराजलोकै-
रिलण्डभूमिपतिभिः परिपुष्यमाणा।
प्राच्यप्रतीच्यविदुषां सुखमादधाना
माताऽद्य नो जयतु संस्कृतपाठशाला॥ ४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या मुग्धबोधजननं रमणं बुधानां
गीर्वाणवाक्प्रसरणं सुतरां व्यतानीत्।
वर्षैः शतेन जगतां हितमावहन्ती
सा शाश्वतीरिह समा लभतां प्रतिष्ठाम् ॥ ५ ॥

कलिकाताराजकीयसंस्कृतविद्यामन्दिरस्य

शताब्दीमङ्गलपञ्चकम्।

शम्भुप्रेमहरिप्रसादभरतैर्याभूत् पुरा संस्तुता
या नारायणदीननाथुगिरिशैः कौवलमहेशेश्वरैः।
तारावीरहरप्रसादजयगोविन्दाद्यकालीशिवैः
कामाख्याप्रमथप्रसन्नमधुभिश्चोज्जीविता चोर्ज्जिता ॥ १ ॥

चन्द्रनीलमणिलक्ष्मणोज्ज्वला
द्वारिकेशमुरलीनिनादिता।
या सतीशकरलाञ्छिताधुना
प्याशुतोषमहिमप्रतिष्ठिता ॥ २ ॥

सेयं संस्कृतशाला न कस्य सन्देहदष्टसामर्थ्या।
च्युतसंस्कारा विदुषो वागिव चित्तं वितापयति ॥ ३ ॥

श्रुतसम्पदा च वयसा गरीयसी
बहुलीभवन्मधुरकीर्त्तिसौरभा।
मुदमातनोतु विदुषां पुरेव सा
लभताञ्च वङ्गवरतीर्थगौरवम् ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शताब्दीपूरणानन्दमङ्गलव्यापृतात्मनाम्।
शताब्दीमङ्गलं भूयो भूयादत्रार्थनेति नः ॥ ५ ॥

अन्यतमाध्यापक-श्रीसुरेन्द्रनाथशर्म्मणाम्।
२०।१।२४।

१। शम्भुचन्द्रवाचस्पतिः; प्रेमचन्द्रतर्कवागीशः; हरिप्रसादतर्कभूषणः (१८२४ खृः अ); भरतचन्द्रशिरोमणिः; शम्भुहरिभक्तनटैः कृतस्तवेति ध्वनिः।

रामनारायणतर्करत्नः; दीननाथन्यायरत्नः; नाथुरामशास्त्री (१८१४ खृः अः); गिरिशचन्द्रविद्यारत्नः; Cowell साहेव; महेशचन्द्रन्यायरत्नः; ईश्वरचन्द्रविद्यासागरः; तारानाथतर्कवाचस्पतिः; ताराप्रसन्नविद्यारत्नः; वीरेश्वरचट्टोपाध्यायः, M A; मं मं हरप्रसादशास्त्री, M A; (विविधविघ्नेऽपि कृतित्वात्); जयनारायणतर्कपञ्चाननः; जयगोपालतर्कालङ्कारः; गोविन्दशास्त्री; आद्यनाथमुखोपाध्यायः, M. A. गणितशिक्षकः, वर्त्तमानप्रधानशिक्षकस्यापि नाम; मं मं कालीप्रसन्नविद्यारत्नः M A; कालीधनन्यायरत्नः; कालीनाथमुखोपाध्यायः B. A. इं राजीशिक्षकः; मं मं कामाख्यानाथतर्कवागीशः; मं मं प्रमथनाथतर्कभूषणः; प्रसन्नकुमारसर्व्वाधिकारी; मं मं मधुसूदनस्मृतिरत्नः; अन्यापि कामाख्याप्रमथोद्दिष्टनिर्म्मलमद्यैरुज्जीविता भवति।

२। मं मं चन्द्रकान्ततर्कालङ्कारः; चन्द्रकान्तमुखोपाध्यायः, B. A.; इं राजीशिक्षकः; मं मं नीलमणिमुखोपाध्यायः M. A.; मं मं लक्ष्मणशास्त्री द्राविड़; द्वारिकानाथविद्याभूषणः; मुरलीधरवन्द्योपाध्यायः M. A.; मं मं सतीशचन्द्रविद्याभूषणः M. A.;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यस्येतिहासः। विदितमेव सर्वेषां यत् संस्कृत भाषायाः कोपीतिहासो न वर्त्तते। कस्मिन् समयेऽस्याः कीदृग् दशा जाता, सा तु अनवगतैव बहुभिः अथवा प्रायः सर्वैरेव। यद्यपि पाश्चात्यकोविदवरैः कृताः केचिदितिवृत्तग्रन्थाः संस्कृतसाहित्यस तथापि सम्यगालोचनाभावात् असाम्प्रदायिकत्वाच्च भ्रमबाहुल्यमि लक्ष्यते तेषु। यदि नाम केचित् महाभागाः बहूनां जनानां जिज्ञासा स्तर्पयितुं प्रयतमानाः तस्मिन् विषये श्रमलवान् स्वीकृत्य प्रबन्धा रचयेयुः, तर्हि महामहोपाध्याय-श्रीमत्पद्मनाथभट्टाचार्य्यपादास्तेषा मुत्साहवर्द्धनार्थं द्वादशशतानि मुद्राः प्रयच्छेयुः। आशास्यते ताव कश्चित् केचिद्वा महाभागाः महामहोपाध्यायपादानां एतमर्थं साद स्वीकृत्य अस्मिन् विषये श्रमस्वीकारं विधास्यन्ति। समयस्ताव अष्टचत्वारिंशत् प्रबन्धा विधेयाः, प्रतिप्रबन्धं पञ्चविंशतिर्मुद्र दीयन्ते।

स्यर आशुतोषमुखोपाध्यायमहिमप्रतिष्ठिता (१९१०—१९२० खृः अः अधुनापि वर्त्तमानाध्यक्षाशुतोषमहिमप्रतिष्ठितास्ति।

२। सन्दिग्धसामर्थ्या च्युतसंस्कारदोषदुष्टा पण्डितवाणी। यथ काचित् सुपंकृता बाला वृथा सन्दिग्धसामर्थ्या च्युतसंस्कारा सती चित्तं तापयतीति ध्वनि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। **কেন না**—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

কালীতন্ত্র—এইরূপ উপাদেয় তন্ত্র এই পর্য্যন্ত আর কোথাও প্রকাশিত হয় নাই। অনেকগুলি প্রাচীন হস্তলিখিত পুঁথি হইতে পাঠ উদ্ধার করিয়া বহু পাঠান্তর, বিস্তৃত সংস্কৃত টীকা ও বঙ্গানুবাদ সহ সংস্কৃতসাহিত্যপরিষৎ হইতে পূর্ণানন্দবংশীয় তান্ত্রিক পণ্ডিত শ্রীযুক্ত সতীশচন্দ্র সিদ্ধান্তভূষণ মহাশয়ের সম্পাদকতায় প্রকাশিত হইয়াছে কালীর ধ্যানের ব্যাখ্যা সম্বন্ধে নানারূপ মত ভেদ আছে। সেই সকলের মীমাংসাপূর্ব্বক বিস্তৃত ব্যাখ্যা প্রদত্ত হইয়াছে মূল্য ৸৵০ দশ আনা মাত্র পরিষদের সভ্যগণের পক্ষে ৷৷০ আট আনা মাত্র

শঙ্করীসঙ্গীতম্—গীতগোবিন্দের অনুকরণে প্রাচীন কবি জয়নারায়ণের রচিত গীতিকাব্য। মূল্য ৵০ ছয় আনা, পরিষৎসভ্যের পক্ষে ৷০ চারি আনা মাত্র

প্রাপ্তিস্থান—সম্পাদক, সংস্কৃতসাহিত্যপরিষৎ

শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

চ্যবন প্রাশ— ৩৲ সের।] [মকরধ্বজ—৪৲ তোলা

অধ্যক্ষ মথুরবাবুর

ঢাকা শক্তি ঔষধালয়।

(১৩০৮ সনে স্থাপিত).

ঢাকা, কলিকাতা, ময়মনসিংহ, চট্টগ্রাম, শ্রীহট্ট, রঙ্গপুর, গৌহাটী, জলপাইগুড়ি বগুড়া, সিরাজগঞ্জ, কাশী, পাটনা, লক্ষ্ণৌ ও মাদ্রাজ।

কলিকাতা ব্রাঞ্চ — ৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিশুদ্ধরক্ত ও সারিবাদ্যরিষ্ট।

সারিবাদ্যরিষ্ট যকৃতের যে কোনপ্রকার দোষ নিশ্চয় দূরীভূত করে এবং লিভারকে কার্য্যক্ষম রাখিয়া মল মূত্র সহ পিত্ত নিঃসরণ করিয়া পিত্তাধিক্যের সমতা করে। হাত পা জ্বালা চক্ষু জ্বালা দাহ প্রভৃতি বায়ু পিত্ত রোগ দূরীভূত করে। পিত্ত দূষিত হইলে রক্তও দূষিত হয়।

সারিবাদ্যরিষ্ট - সর্ব্ববিধ রক্তদুষ্টি, যথা বাতরক্ত শীতপিত্ত, পাঁচড়া, বিখাজ, কণ্ডু কুষ্ঠ বিসর্প প্রভৃতির মহৌষধ।

সারিবাদ্যরিষ্ট - সর্ব্ববিধ বাতের বেদনা, স্নায়ুশূল, গেটেবাত, আমবাত, ঝিঁঝিঁবাত, বাতব্যাধি প্রভৃতি ঐন্দ্রজালিকের ন্যায় প্রশমিত করে।

সারিবাদ্যরিষ্ট স্নায়বিক দৌর্ব্বল্যনাশক, জীবনীশক্তি বর্দ্ধক, কর্ম্মোৎসাহ প্রদায়ক। মূত্র ও শুক্র সম্বন্ধীয় পীড়া, শুক্রতারল্য, খড়িগোলার ন্যায় প্রস্রাব এবং স্ত্রীলোকের শ্বেত ও রক্ত প্রদর প্রভৃতি নিশ্চয় আরোগ্য করে।

সারিবাদ্যরিষ্ট দূষিত সংসর্গজাত বিষাক্ত বীজানু প্রস্রাবদ্বারের ক্ষত, পুঁজ রক্তপাত, স্ফীতি, বেদনা, পারদবিকৃতি প্রভৃতি মারাত্মক দূষিত ব্যাধি মন্ত্রশক্তির ন্যায় আরোগ্য করে।

সারিবাদ্যরিষ্ট—বালক, বৃদ্ধ, যুবা, স্ত্রী পুরুষ সকলেই সুস্থ ও অসুস্থ অবস্থায় সকল ঋতুতে সেবন করিতে পারে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২৸০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯৸০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লী কষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৸০ দেড় টাকা, ৩ শিশি ৩৸৶০ আনা। ৬ শিশি ৭৸০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

প্রকাশকো মুদ্রাপকশ্চ—শ্রীজানকীনাথকাব্যতীর্থঃ।

সংস্কৃতসাহিত্যপরিষৎকার্য্যালয়, শ্যামবাজার ব্রীজরোড, কলিকাতা।

মুদ্রণস্থানং—শ্রীপ্রেস; ১০৭, কর্ণওয়ালিস ষ্ট্রীট, শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४६ शकाब्दे | Reg. No. C. 1073. | ६ष्ठ वर्षस्य
चैत्रे | | १२श संख्या
April 1924. | | Vol. VI. No. 12

संस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

सम्पादकौ— महामहोपाध्यायश्रीदुर्गाचरणसांख्यवेदान्ततीर्थः
श्रीकालीपदतर्काचार्य्यश्च
सहकारिसम्पादकः—श्रीजानकीनाथसाहित्यशास्त्री ।

आशुतोषस्य साधना	४४१	दुर्गेशनन्दिनी	४५८
लक्ष्मणं प्रति शूर्पणखायाः	४४३	नलदमयन्तीयम्	४२५
लीला	४४७	सन्देशाः	४३५
शास्त्रसामञ्जस्यम्	४५२		

प्रतिखण्डमूल्यं ।० चतुराणकम्] [वार्षिकमूल्यं ३) रूप्यकत्रयम् ।
Foreign price 7s. yearly including postage.

परीक्षापाठ्यभूतानि पुस्तकान्यपराणि च ।
लभ्यते न्याय्यमूल्येन परीक्षा प्रार्थ्यते सताम् ॥
छात्र-पुस्तकालय, निवेदिता लेन, वागवाजार, कलिकाता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

अध्यक्षः श्रीजानकीनाथकाव्यतीर्थः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

কেশরাশিকে কুঞ্চিত ও কোমল করিবার জন্যই

কে-শ-র-ঞ্জ-ন-তৈ-ল

এই আসমুদ্র ভারতের সর্ব্বত্রই কেশরঞ্জনের শতমুখে সুখ্যাতি। নিত্য স্নানকালে কেশরঞ্জন মাথায় মাখিলে সমস্ত দিনটী চিত্ত প্রফুল্ল থাকে। কেশরঞ্জন নিত্য মাথায় মাখিলে মাথা ধরা, মাথা ঘোরা, অনিদ্রা, মন হু হু করা প্রভৃতি উপসর্গ বিদূরিত হয়। দেশের রাজা মহারাজা হইতে সামান্য গৃহস্থ গৃহেও কেশরঞ্জনের সমাদর। আপনিও ব্যবহার করুন। মূল্য প্রতিশিশি এক টাকা, ডাকব্যয় সাত আনা।

স্নায় বক দুর্ব্বলতার আশু প্রতিকার।

বলবর্দ্ধক, মেধাবর্দ্ধক ও স্মৃতিবর্দ্ধক মহৌষধ। আমাদের "সঞ্জীবন রসায়ন" স্নায়বীয় দুর্ব্বলতার জন্য যাহাদের উদ্যম-উৎসাহশক্তি-স্ফুর্ত্তি ও স্মৃতিশক্তি বিনষ্ট হইয়াছে, অজীর্ণ অগ্নিমান্দ্য প্রভৃতি গ্লানিকর উপদ্রব উপস্থিত হইয়াছে, তাঁহাদের পক্ষে সঞ্জীবন রসায়ন অমৃতের ন্যায় উপকারী। বিশেষতঃ ইহাদ্বারা বমন, বমনেচ্ছা, উদ্গার, হিক্কা, আধ্মান (পেট ফাঁপা) ও পেট ভুটভাট করা প্রভৃতি পেটগরমের উপদ্রবসমূহ অচিরে নিবারিত হইয়া থাকে। এক কথায় বলিতে হইলে, অজীর্ণ, অগ্নিমান্দ্য ও স্নায়বিক দুর্ব্বলতা নিবারণ জন্য এবং ছাত্রগণের মেধাবৃদ্ধি করিতে "সঞ্জীবন রসায়নের" ন্যায় অন্যর্থ ঔষধ অতি বিরল। এক শিশির মূল্য ১৲ টাকা। মাশুলাদি ৵০ আনা।

পরিবর্ত্তিত **সচিত্র কবিরাজি-শিক্ষা।** পরিবর্দ্ধিত

শ্রীযুক্ত নগেন্দ্রনাথ সেনগুপ্ত প্রণীত।

সমগ্র আয়ুর্ব্বেদ শাস্ত্রের সার সঙ্কলন। বড় বড় আটটী খণ্ডে সমগ্র পুস্তক বিভক্ত অতি সরল ভাষায় লিখিত হওয়ায়, কেবল চিকিৎসকের নয়—সাধারণ গৃহস্থের পক্ষেও ইহা একখানি নিত্য-ব্যবহার্য্য গ্রন্থ। নাড়ী পরীক্ষা হইতে আরম্ভ করিয়া সমস্ত রোগের নিদান, চিকিৎসা-প্রণালী আয়ুর্ব্বেদীয় ঔষধ তৈল, ও ঘৃতাদি-প্রস্তুত-বিধি, এবং বিষচিকিৎসা দীর্ঘজীবন-লাভের উপায়স্বরূপ স্বাস্থ্যকারক স্থানসমূহের পূর্ণবিবরণ, রোগীর পরিচর্য্যা ও দ্বিতীয়খণ্ড মহর্ষিদের গৌরবস্বরূপ—সুশ্রুত-সংহিতা এই সংস্করণে সন্নিবেশিত হইয়াছে। মূল্য ২॥০ টাকা। ডাকমাশুল ও প্যাকিং ৸০ বার আনা।

কবিরাজ নগেন্দ্রনাথ সেন এণ্ড কোং, লিমিটেড।

১৮।১ ও ১৯ নং লোয়ার চিৎপুর রোড, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

संस्कृतसाहित्यपरिषदो मुखपत्रम्

षष्ठवर्षीयम्

(१८४६ शकीयम्)

वैशाखाच्चैत्र पर्य्यन्तम्

संस्कृतसाहित्यपरिषद्भवनम्
श्यामबाजार ब्रीज रोड
कलिकाता ।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः ।
संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता ।
मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८४५ शकाब्दीय संस्कृतसाहित्यपरिषत् पत्रिकागतविषयसूची

अतिथिसेवा...श्रीयुक्तदक्षिणारञ्जनशास्त्री M.A. . . २८१

अभिनन्दनम् ३८८

अष्टमनिखिलभारतीयसंस्कृतमहासम्मेलनम् . . . १८७

आवेदनम्...सम्पादकौ ३५४

आशुतोषस्य साधना...पञ्चाननकाव्यतीर्थः . . . ४४१

इराणीयानां प्राचीनसाहित्यम्...वसन्तकुमारचट्टोपाध्यायः M.A. १४१

उग्ररथशान्तिः...नेपालराजसदस्याः . . ४१

उत्तरमालिका...शालग्रामशास्त्री विद्याभूषणः . . १८०

उपनिषत्कथा...म. म. दुर्गाचरणसांख्यवेदान्ततीर्थः . ४७

उपासना...शरत्कमलकाव्यन्यायस्मृतितीर्थ . १६७, २१४

२४३, ३७७, ४०२

ऋतुविलसितम्...लक्ष्मीनारायण-रामशर्माद्विवेदः . १६१

ॐनमः शिवायेतिशिवस्तोत्रम्...म. म. यादवेश्वरतर्करत्नः . २०१

कलिस्तोत्रम्...गिरिशचन्द्रसेनकविरत्नः . . ५१

काशीप्रशस्तिः...हरिहरशास्त्री . . . १३७

कालिदासस्यकुशलानुयोगस्य...K. A. रामलिङ्गशास्त्री . १४७

किं भवभूत्युपज्ञं सीतारामयोः पुनर्मिलनं न वा...

सुरेन्द्रनाथशास्त्री M.A. . . , १७१

गुरुस्तोत्रम्...हरचरणतर्कचूड़ामणिः . . ४०१

चन्द्रालोकम्...धूर्ज्जटीप्रसादकाव्यतीर्थः . . ३४, १०८,

१४५, १८२, २०७, २५१, २८६, ३४१

जातिबाधकविचारः...कालीपदतर्काचार्य्यः . . ३७, १०२,

१३३, २३४, २५७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवात्मा विभुः परिच्छिन्नो वा ?...वेदानन्दतीर्थः . . . १२८
दुर्गाप्रनन्दिनो ..श्री... . . . . २५, १०५
१५४, १८६, २२५, २६२, ३८१, ४१६, ४५८
दुर्गोत्सवः...जानकीनाथसाहित्यशास्त्री . . २३०
नक्षत्रम्...उपेन्द्रनाथसेनगुप्तकाव्यतीर्थः . . ३०
नलदमयन्तीयम...कालीपदतर्काचार्य्यः . . ३६७, ४२५, ४६५
नववर्षमङ्गलम्... . . . . . १
निदाघतापः...कालीपदतर्काचार्य्यः . . . ७७
नैरुक्तमालोचनम्...श्री १३, ६५
न्यायविद्या...तारानाथतर्कतीर्थः . . . ४२१
परिषदो वार्षिकी आयव्ययसंक्षेपलिपिः . . ११८
प्रतीक्षा...जानकीनाथसाहित्यशास्त्री . . . २२५
प्रशस्तिः ३८१
प्रसूनवाटिका—गुलेस्ताँ...रामस्वामी . २०, ६०, १५१, १७८
प्राप्तपत्रे ४३३
मधुमङ्गलम्...यामिनीकान्तसाहित्याचार्य्यः . . ४१३
रथयात्राभ्रान्तिनिरासः...चण्डीचरणतर्कतीर्थः . ९८
राधिकाविरहः...योगीन्द्रनाथविद्याचुञ्चुः . . ८१, १२१
रासविहारः... " " . . २६५, २८०
लक्ष्मणं प्रति शूर्पणखा...यामिनीकान्तसाहित्याचार्य्यः . ४४३
लीला...भवभूतिविद्यारत्नः २२, ५८, ८४, १३०, २०४,
२४८, ४१०, ४४७
वनवासः...गुरुस्वामी शास्त्री २२०
वर्षारम्भे...कृष्णप्रसन्नतर्कवागीशः ३
विजया...यामिनीकान्तसाहित्याचार्य्य . . . २४१
विविधवार्त्ता २७५, ३९८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान्तविमर्शः... शिवनारायणशास्त्री . . . ६, ५३
शताब्दीमङ्गलपञ्चकम्...सुरेन्द्रनाथविद्यारत्नः M.A. . ३८७
शताब्दीमहोत्सवः ३८४
शारदप्रकृतिः...यामिनीकान्तसाहित्याचार्य्यः . . २१८
शास्त्रसामञ्जस्यम्...म. म. कैलासचन्द्रसांख्यपुराणतीर्थः . ३३५, ३६४, ४०५, ४५२
शोकरुदितम् ३२४
शोकसभा ३२३
श्रान्तः पान्थः...योगीन्द्रनाथविद्यारत्नः . . १४४
षष्टितन्त्रशास्त्रपरिचयः...सदानन्दभादुड़ी M.A. . . १६४
संस्कृताभिनयदर्शनम्..म. म. यादवेश्वरतर्करत्न . . ३०६
सन्देशाः ३८, ७८, ११५, १५८, २३७, ३१८, ३५८, ४३५, ४७३
सप्तमवार्षिककार्य्यविवरणम् ८६
सभापतेर्भाषणम् १८२
सभापतेर्महाप्रयाणम् ३२१
समालोचनम् ७२, १५७, २७३, ३१७, ३५७, ४३८
सारस्वताष्टकम्...हेमचन्द्र आयुर्वेदाचार्य्यः . . ३६१
स्वागतसङ्गीतकम्...म. म. गणनाथसेनः M.A. . ३८५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृतसाहित्यपरिषत् प्रतिभा रवेः ।
भावालोकैर्मनःपद्मं प्रकाशयतु धीमताम् ॥

१८४५ शकीये चैत्रे, ६ष्ठ-वर्षस्य १२श-संख्या

आशुतोषस्य साधना ।

लेखकः श्रीपञ्चाननकाव्यतीर्थः

आसीत् नदीयाप्रदेशान्तर्गते महाजनपुराख्ये ग्रामे श्रीमदाशुतोषरायो नाम कश्चित् वारेन्द्रकुलोद्भवो विप्रसाधकः ।

नदीयाप्रदेशान्तर्गते खड़ियाख्यायास्तटिन्युत्तमायाः वीचिचुम्बितत्रिवट्टाख्ये निसर्गसुषमासम्पत्सारे सोऽजनि ।

त्रिवट्टविषये नदीयाधिपतेरेकः कृष्णरायसंज्ञको देवविग्रहविशेषस्तज्जनपदवासिनां भक्तिमाददानस्तेषां पुण्यपरिणाम इव वर्त्तते ।

मन्यामहे एवं सजलाम्बुदप्रभस्तत्प्रभुरेव व्रजभुवं विहाय प्रेमततिं तनोतिस्म । अस्मदाशुतोषोऽपि प्रकटिते तस्मिन् तत्प्रेमवञ्चितो माभूदिति, अपि तु भक्तसकलसर्वस्वमणेस्तस्य विभोः प्रेमज्योतिषा तस्य ध्वान्तानि सान्द्राविद्यातमांस्येव दूरीकृत्य योगस्य इन्द्रियग्रामसंयममपरोऽसौ गुहाशयोत्तमश्लोक इव शैवाश्रयणमधिगतो नितरां निखिलजनाननुरञ्जयति । राय इति पदस्य धनवाचित्वात् परमपुरुषकृष्णरायस्य संज्ञा भक्तजनस्वर्णानुक्रमेणानेन चोरितेति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्चरितानुध्यानप्रसङ्गादनिर्व्वचनीयानन्दमूलकोऽयं विन्यासोऽथवा सेव्यसेवकयोर्भेदो न युज्यते यदि, भगवद्भक्तिरवलम्बनीया यदि, तद्विकल्पस्य तर्हि क्व प्रसङ्गः ?

यातु, आशुतोषस्य महात्मनामभ्युदयं पश्यद्भिरस्माभिरपि ज्ञापितोऽयमनुशयः, यदयं एवम्भूतं उपासकप्रवरं अज्ञात्वा तं "उन्मत्त एष, आभिचारिकमन्त्रैर्जड़ीकृत एष" इत्यादिभिः प्रभूतैः कल्पनोत्थैर्विसंवादैरुपेक्षितं प्रतिपादितवन्तः । असौ भावितात्मा बाल्ये विद्यार्ज्जनपाटवं प्रदर्श्य स्वजनान् शिक्षकांश्चातितरां पुलकितान् कृतवान् ।

ब्रह्मवुभुत्सया सन्ध्याह्निकक्रियाततपरतया च परस्परं भूषणभूष्यभावं विदधे । जपयज्ञनिष्ठोऽसौ स्वेष्टदेवमूर्त्तिं ध्यायन् प्रायशः जननुग्रत्सङ्गरहितो मानवक इव क्रन्दितुमभ्यस्तश्चासीदित्यपि वयं अपश्याम । स हि श्रीरामपुराख्यस्य ग्रामस्य कस्यचित् कुलीनब्राह्मणस्य दुहितुः पाणिं पीड़यामास । तस्या गर्भे च कन्यामेकां जनयति स्म ।

यूनामुपभोगासक्तिं पराजित्य साधकविजयवैजयन्तीविमण्डितः परमरायमधिकृत्याशुतोषः समाधौ स्थिरप्रतिज्ञोऽधुना हर्षोत्सं तथा विस्मयसीमानमुत्तरोत्तरं वर्द्धयति नः ।

काशीप्रयागादीनि तीर्थस्थानान्यपि एकलो विभुप्रेमोन्मत्ततया पर्य्यटन् गृहमागत्य महाजनपुरस्थं कुटस्वनिलयं अलङ्कृत्य मौनमवलम्ब्य च द्वादशवर्षाणि यावत् शय्यामधिशेते ।

आहारे नास्था, विहारे वीतरागता, स्नानेन किमस्य विवेकसुरप्रवाहिणीवारिस्नापितचित्तस्य, किमस्य जनसदसि वाक्पटुत्वमात्मारामसंयोगप्रियस्य ? रुद्धेन्द्रियक्रियस्यैवं दिनानि विगतानि ।

अमृतस्य पुत्रोऽधुनामृतत्वमास्वादयति ।

कति वर्षाण्यतीतानि, विस्मयावहोयमुदन्तोस्माभिः श्रुतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ भगिनीपतेर्भवनं दहताग्निदेवे अकाण्डेऽयं शरीरिणां प्रकृतिसुलभशरीररक्षणप्रयासे मनाक् चञ्चलो भूत्वा वरुणगृहाद् ह-र्गतवान् । न कोऽपि तस्य गृहद्वारमुन्मोचयति स्म ।

आश्चर्य्यमेतद्बहुजनैः परिदृष्टं । एतदपि श्रुतमसौ वाग्विरतः प्रागेवावदत् "गृहमिदमग्निसंलग्नं भविता श्वः" ।

परमानन्दहेतुरिदमप्यस्माकम् यत्, नास्त्यस्य साधुवादप्रचारभूमा स्वेन कदापि । इदानीन्तनकाले कलिकल्मषनाशाय कैवल्यं श्रितानां फलृपाधिपल्लवितसंज्ञकानां केचन स्ववाटमलङ्कुर्व्वंतामीदृशीं यशो-लिप्सां प्रतीचन्ते यत् सर्व्वत्र तैर्नतिर्न तथा ।

साधनभूमौ ते खट्वारूढाः, मङ्गलघटविरहिते यशोद्वारि प्रवृत्तिः पण्यजीविनी । वनदेवीव प्रसूनकदम्बसुरभिविस्तारनिपुणा निवृत्तिस्तद्भयभीता इव सती आत्मगोपनतत्परातिगहनाटव्याम् । भद्रं वितरतु जगद्विधाता, भूदेवाश्च देवाः भवन्तु, आशुतोषस्तोषयत्वखिलजनान् इति शम् ।

लक्ष्मणं प्रति शूर्पणखायाः ।

(लेखकः—श्रीयामिनीकान्तसाहित्याचार्यः)

स्निग्धाञ्जनं नयनयोरमृतं शरीरे
मोदो महान् मनसि कोऽयमपूर्व्वमूर्त्तिः ?
यस्यावलोकनमहोत्सव-लोलुपानि
सर्व्वेन्द्रियाणि मम हा नयनीभवन्ति ।

धिग् वेधसं सकललोकललाममेनं
सृष्ट्वा निकृष्टमतिना यतिना समानः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेधः किमोस्वयसे विहितः किमस्मै
सत्यं वचो 'जगति भिन्नरुचिर्हि लोकः' ।

नेत्रं सकृत् सपदि सुन्दरमस्य यस्यां
पादं दधाति दयितेति धिया कृशाङ्गी ।
कस्मिन् कियत् क्व नु समास्य तपो विधाय
मारोजसुः सुतनुरेतदसौ विधत्ते ?

किंवा विधिर्निखिलशिल्पनिधिर्विचार्य
चेतःपटे सकलसुन्दरसारभागैः ।
आरोप्य रूपमतुलं कृतजीवयोगो
जैत्रं युवानमसृजत् प्रथमप्रकाशं ।

बन्धो ! क्व ते सरससुन्दररूपमेतत्
क्वासौ मरोः सहृदतापसतीक्ष्णवंशः ?
न ज्ञायते किमपि चेतसि सन्दधानो
धातामृतं गरलसङ्गतमातनोति ।

चन्द्रे कलङ्कमिव कीटमिव प्रसूने
व्यालं विलग्नमिव चन्दनपादपाङ्के ।
संवीक्ष्य भीषणमिदं त्वयि जाटजूटं
सत्यं सखे स्फुटति चित्तमिदं मदीयम् ।

किं जीवनप्रतिम ! यौवनपूर्व्वभागे
भोगे विरक्तिमतिरिक्ततमां विधत्से ?
रूपानुरूपमयि रूपवतां वरेण्य !
नालोकसे किमपि मित्रकलत्रमत्र ?

प्रेमैकपात्र ! शतपत्रदलैकजैत्रं
नेत्रं प्रवर्त्तय मुहूर्त्तमथात्र देहे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यत्तवास्ति रुचितं तदिहास्ति सर्व्वं
रूपं वयो रतिरसो वचनप्रकारः ।

दृष्ट्वा सखेऽसि विदितो विबुधप्रवीणः
कार्य्येषु किं विरचयिष्यति वैपरीत्यम्
नानासुखोचितमिदं सरसं शरीरं
दुःखाय रुक्षतपसा विरसीकरोषि ।

रोचेत तुभ्यमथ चेद् विपिने तपस्या
योगाश्रमं मम मनोगहने विधेहि ।
मोक्षः कियान् स हि पुनर्भवता विनेयो
नूनं भविष्यति फलिष्यति सर्व्वकामः ।

राज्यप्रयोजनमिदं यदि ते तपः स्याद्
राजीवलोचन ! विलोचय यौवनेन ।
पुञ्जीकृतानि भवतोऽखिलसाधनानि
लब्धे शुभे सुभग ! साधय जैत्रयात्राम् ।

मन्यस्व माममरवाञ्छितमृद्धराज्यं
कामस्य कामचरणेन विशीर्णमूलम् ।
शीघ्रं समेत्य वशमानय भूमिमेतां
रत्नानि यत्नरचितानि च तानि तानि ।

यत्त्वं सखे सकललोकविलोभनीयं
शीर्णं करोषि नवयौवनमेतदेव ।
दासीं सदा दहति दीपयदत्युदग्रां
ज्वालां करालवदनां वत किं करोमि ।

शेषे रसोरसि निशासु शिलोपधानं
यत्त्वं सखे तदधिकं ननु बाधते माम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रूरे कुशाङ्कुरमये पथि पादपद्मं
यत् पात्यते पतति तन्मयि भीमवज्रम् ।

बन्धो ! कथं व्रजसि बन्धुरभूमिभागे
मञ्जं चकास्ति भवति मम हृन्निकुञ्जम् ।
एहि प्रिय प्रथय तत्र विलासलीलां
शून्यं नृपासनमशून्यमिदं कुरुष्व ।

दूरे विधेहि दयितेश ! महाविशालं
लौहं धनुः करिहरीन्द्रवधे विदग्धम्
हित्वा जटां सुविकटां कटु वल्कलञ्च
रूपोचितं रचय सुन्दरसभ्यवेशम् ।

क्लान्तोऽसि चेद् विपिनपर्य्यटनप्रयासै-
रायाहि ते क्लमविनोदमहं विदध्याम् ।
कुम्भाविमौ मदनमन्त्रमहाप्रभावौ
शान्तिं विधास्यत इतो रससन्नियोगात् ।

भानुर्विहायसि भृशं तपतीति बन्धो !
तृष्णाकुलं तव मुखं ननु लोकयामि ।
सञ्जीवनीमयि सुधां हृदये निधाय
मुग्धाधरस्तव कृते कुरुते व्यपेक्षाम् ।

प्रेम्नः पयोधर ! कियच्चिरमाकुलेय-
मालोकतां तव मुखं तृषिता चकोरी
दूरेऽस्तु वारि मधुरं मृदुगर्ज्जितं ते
नोपार्ज्यते श्रुतियुगेन सखे ! हतास्मि ।

सत्यं ममैव शतशस्तव कामिनीनां
सन्ति प्रिय ! त्वमिव मे नहि दृश्यतेऽन्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भानोः शतानि विलसन्मधुपद्मिनीनां
तासां पुनर्द्दिवसपालक एक एव।

लीला

(पूर्व्वानुवृत्ता)

लेखकः—श्रीभवभूतिविद्यारत्नः।

मम द्वितीयकर्म्मस्थलमासीन्मातुलालयानतिदूरस्थितश्यामक (वाराकपुर)नामा जनपदः। तत्स्थानादन्तरान्तरा मे पितृपदाधिकारिणो मातुलदम्पत्योश्चरणदर्शनभाग्यमायत्तमभूत्। तावपि मां सन्निहितमवाप्य परं हर्षं जग्मतुः। मम स्वदेशागमनकथामाकर्ण्य पुनरेव बहवः कन्याजनका मह्यं स्वदुहितृदित्सवः प्रभुभूतस्य मातुलपादस्य भवनं गन्तुमारेभिरे। वधूवदनदिदृक्षुभ्यां वार्द्धक्यदशामापन्नाभ्यां मातुलदम्पतिभ्यां सविशेषमनुरुद्धोऽपि लीलाचरितदर्शनेन नारीजनचरित्रेष्वश्रद्धान्वितो नारीपाणिग्रहणं केवलं क्लेशकरमिति जातप्रत्यय आजीवनं कौमारव्रतं निष्ठचुर्विनयनम्रवचनं तौ न्यवारयम्। नूनं केनाप्यभिशापेन दिग्धं लीलाचिन्तनं मम हृदयतलमधरकार्षीत्, अन्यथा सद्भिरद्धितेऽस्मिन्नधिष्ठानेऽपि रततद्विज्ञानप्रयागरतस्य मे हृदयात् तस्या मायामयी मूर्त्तिः कथं नापसृता! भवतु स्मृतिपथात् तन्मूर्त्तिमपसारयितुकामो विषयाद्विरतचित्तस्तपोनिरतो मुनिरिवैकाग्रमनाः तात्कालिकनानादेशहितव्रतेष्वात्मानं न्ययोजयम्। तत्फलेनाल्पापि मम सुयशः सर्व्वत्रैव परिकीर्त्तितमभूत्, परिणामतश्चाहं राजपुरुषैरशेषकर्म्मपुरुषेन।

एवं समतीतो दशवर्षकालः स्वकीयप्रतिहतमन्थरणक्रमेण ममोपरि संवर्त्तयन् ह स्वप्नेषु दमये विशेषवटने। ह वृत्तमासीन्मत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म्मपाटवाकृष्टराजपुरुषप्रसादादात्मपदोन्नतिसहितो राजसम्मानोपाधिलाभः, विषादवृत्तं तु करुणावतोर्देवतोपमचरित्रयोर्मातृपितृतुल्ययोर्मातुलदम्पत्योर्यथाक्रममरधामगमनम् । तदानीमुन्नतपदाधिरूढेन चिरकृतज्ञेन मया महाड़म्बरेणैव सम्पादितस्तयोः श्राद्धोत्सवः । अवसरेऽस्मिन्नेतदपि वक्तव्यं यन्मम पैतृकभूमिर्नवपल्ली मया न विस्मृता । मातुलदम्पत्योः स्वर्गमनात् परं जन्मभूमेरवस्थामवलोकयितुकाम एकस्मिन् दिवसे तत्राहं गतः सर्व्वैरेव पल्लीजनैः परमादरमभ्यर्थितः । किमधिकं विस्मयकरं स्याद् यद् येनैव पितृव्यमहोदयेन प्रागहमनाथदशायां सकृदपीदानीनापि नानुगृहीतः, इदानीं स आकर्णितमदभ्युदयवृत्तान्तः स्वार्थपूरणच्छिद्रसन्धानरतः साधारणेषूच्चकण्ठमात्मवंशोज्ज्वलदीप इति मामुद्घोषयितुं प्रवृत्तः । तस्यैतेनापूर्व्वाचरणेन नोत्पाटितं मे हृदयप्रोतमभिमानशल्यं, यदि च धैर्य्यशीलेन मया तस्मै बहिरात्मीयभावः संरचितः । ततः स्वगृहसंस्कारदत्तदृष्टिः सत्वरं पैतृकभवनं बृहद्धर्म्मशालारूपेण परिणमय्य, स्वग्रामे च दैन्यपीड़ितानां पल्लीवासिनां कृते निम्नोच्चौ द्वौ विद्यालयौ संस्थाप्याप्रवं कामपि चित्ततृप्तिम् । चन्दननगरस्थितो मातुलालयोऽप्युत्तराधिकारसूत्रेणाधिगतः कारितसंस्कारः पुण्यचरितयोर्मातुलदम्पत्योः शाश्वतस्वर्गभोगार्थमतिथिशालारूपेण परिवर्त्तितः, तत्र च संस्थापितं भगवद्भक्तयोः स्वर्वासिनोस्तयोः परितृप्तये नित्यदेवार्च्चनविधिकर्मिकं विष्णुमन्दिरम् ।

एवम्प्रकारेणाहमविरतजनहितसाधनव्रती विरलीकृतलीलाचिन्तनः सुकृतकृतापूर्व्वचित्तप्रसाद आयुःसलिलतरङ्गप्रतीकाशानि दिनानि यापयितुं प्रवृत्तो यदैकदा प्रातर्नित्यदैनिकवार्त्तावहपत्रपाठक्रमेण मया दृष्टमधोलिखितं मृत्युघोषणम्—

"मृत्युसंवादः—दुःखदुःखेन वयं वारेन्द्रभूमेः स्वनामधन्यमहात्मनः स्वर्गतस्यानन्ददेवरायस्यानुरूपसहधर्म्मिण्याः प्रथितकीर्त्तेरधिकरणिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषस्य रायवाहादुरोपाधिकस्यौयतसुशीलकुमारचक्रवर्त्तिनः स्वसुधर्म्मागतप्राणाया वङ्गकुललच्मीललामभूताया: साध्वीशिरोमणेर्लीलादेव्याः स्वर्गमनवार्त्तां समुद्घोषयामः। अनेन हि नारीरत्नेन परिणयात् स्वल्पकालानन्तरमेव वैधव्यं गतेन कैवल्यधर्म्मकर्म्मभिः स्वजीवनावशेषं यापयितुमभिलषता स्वभूमौ निर्म्मापितानि बहुधर्म्मशालादेवायतनानि प्रतिष्ठापितानि च साधारणहितार्थं बहूनि सरस्तीर्थातिथिभवनानि। पुण्यचरितायास्तस्याः प्रधानधर्म्मकार्य्याणि खल्वासन् स्वाधिकृतभूभागेषु ये च निःस्वगृहस्था वर्त्तन्ते स्म, तेभ्यो लेशतोऽपि करमगृहीत्वान्नाच्छादनप्रदानम्, अनाथच्छात्राणामध्ययनसौकर्य्यार्थं नानास्थानेष्ववैतनिकविद्यालयस्थापनं, दयिततनयविरहिताभ्यो दीनरमणीभ्यश्च स्वजीविकोचितवृत्तिप्रदानम्। श्रूयते च निरपत्या सा स्वत्यक्तसर्व्वसम्पत्तेर्विनाशभयाद्देवस्वत्वेन परिणमितायाः निखिलतत्त्वावधानभारं यथा सा चिरजनकल्याणसाधिका भवेदिति स्वभ्रातुः सुशीलकुमारस्य हस्ते समर्प्य स्वर्लोकं प्रस्थिता। जरामरणरहितायां नित्यानन्दपूर्णायां स्वर्भूमौ प्रस्थितपूर्व्वेण पतिदेवेन मिलित्वोपभुङ्क्तां पुण्यवती नित्यपतिसेवनसुखसौभाग्यमितिमात्रमुल्लिख्य वयं शोकप्रसङ्गमेनमुपसंहराम इत्यलम्।"

एतेनातर्कितलीलोपरतिसंदेशेनाहं तच्छोकानलदग्धहृदयो व्यचिन्तय"अहो! प्रस्थिता लीला मम हृदयस्य तच्चिन्तावसरावशेषमपि विलोपयितुम्!" पूर्व्वं येन तत्प्रत्याख्यानजनितेनाभिमानेनाहं स्वमनसः तस्य सुखमयीं स्मृतिमप्यपसारयितुमुद्यतः तस्यां सर्व्वप्रत्याख्यानातीतमपरलोकं गतायामिदानीं सोऽभिमानो विलुप्तः। विशेषतः संदेशपत्रे लीलाभ्रातृरूपमात्मपरिचयं, तदन्यानपरजनान् विहाय च ममैवोपरि तस्याः स्वसम्पत्तितत्त्वावधानभारार्पणमवलोक्य "अहो! प्रेममय्या तया न विस्मृतोऽयं वराकः, न च विस्मृतं 'नापसारयितुं शक्या तव मूर्त्तिरेतद्दुर्भगहृदयादि'त्यात्मनः पूर्व्वनिवेदनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संयतचित्तया तया परिणयात् परं विशुद्धजीवितं धारयितुकामया मत्प्रणयमवैधमिति मन्यमानया निर्म्मलभ्रातृस्नेहेन स परिणमितः, मूढ़चित्तेन मया तु तस्यास्तं पवित्राभिप्रायमज्ञात्वा तत्सविधे कल्मषमयपुनरुद्वाहप्रस्तावोत्थापनेनात्मनो बालिश्यमेव प्रदर्शितम्। अपि च तस्या औदास्यपूर्णं मौनभावं दृष्ट्वा मोहान्वितेन मया चिरमत्-पक्षपातिन्यां तस्यां कृतघ्नत्वमपि समारोपितम्।" इत्येवम्भूतचिन्ता-कुलचित्तोऽहमतर्कितं कियन्तं कालमत्यापयमिति न जाने, यदा मदीयासन्नपरिचारको मदन्तिकमुपागम्य मम हस्ते लाक्षामुद्रासनाथं पत्रमेकमदात्। पत्रस्यावरणभागं मयमनसिंहनामाङ्कितं निरीक्ष्य "हो नूनं समागतमेतल्लीलाधिष्ठानादि"त्यतीव समुत्सुकः तत्पत्रावरण-मुन्मोच्यापश्यं तत्र लिपिद्वयम्। तयोरेकः खल्वमरधामप्रस्थितया लीलया लिखितं मां प्रत्यन्तिमः शेषनिवेदनम्, अपरञ्च मदुपरि राज-पुरुषस्वाक्षरान्वितं तत्सर्व्वसम्पत्तितत्त्वावधानभारसमर्पणपत्रम्। तस्या निवेदनपत्रे एवं लिखितमासीत्—

"भ्रातः सुशीलकुमार,

इदानीं स्वजीविताबसानं समागतमवलोक्यातिकठिनहृद्रोगा-क्रान्ताहं चिरानुकूलं त्वां ज्ञाताज्ञातात्मनिखिलापराधकृते क्षमां याचमाना मदीयं शेषनिवेदनमेतल्लिखामि। आशैशवज्ञातं तव चरित्र-विषयं विचिन्त्य, अगणितमदपराधनिचयस्त्वं सानुग्रहः सर्व्वमेतन्मम निवेदनं नावज्ञास्यसीति निःसन्देहास्मि। पूज्यजनैर्यदा त्वां परि-हृत्यानेन सह मम परिणयः सम्पादितस्तदैवाहमार्य्यकुलसम्भूता स्वपतिदैवतदत्तचित्ता कठोरात्मसंयमेन तव प्रेममयमूर्त्तिं हृदया-दपसार्य्य तव भ्रातृमूर्त्तिं ते समस्थापयम्। ततोऽधिकरणिकपुरुष-रूपेण मयमनसिंहे गमनवार्तां निशम्य भगिन्येव मया कृतं त्वदीया-मन्त्रणम्। प्रोषितपूर्व्वभावस्य तव मुखात् अविधवोचितं पुनरुद्वाह-प्रस्तावमाकर्ण्य, यदि विस्मृतप्रायः शैशवप्रणयः पतिरहिताया मे नारी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनोचिते दुर्ब्बलहृदये पुन: समुदीयादित्याशङ्कया त्वत्सकाशादात्मान-मगोपाये। अन्यथा न मन्यस्व भ्रातस्तन्मे त्वदवगणननिमित्तं प्रत्याख्यानम्। ततो मद्गृहात् प्रस्थिते त्वयि कातरकातरया मया नयनवारिवर्षैर्भूमितलं कीदृशमवाकीर्णं तद्विदितं सर्व्वान्तर्यामिनैव। भवतु, परिणयात् परं मम हृदयपटे नवस्थापिता ते भ्रातृमूर्तिः न कदाचिदपसृता। कियत्कालं यावदतिप्रबलहृद्रोगाक्रान्तया ममैतच्छेषापराधनिवेदनम्।

मृतुरसुखपतनोन्मुख्यास्तव भगिन्या अपरञ्च निवेदनं यत् केवल-धर्म्मकर्म्मभिरात्मजीवनावशेषं यापयितुकामया मया निराश्रयभिक्षुक-पथिकादीनां समुपकृतये संस्थापितान्यत्र बहुसंख्यकधर्म्मशालातिथि-भवनानि, दीनगृहस्थानामनाथबालकविधवानाञ्च प्रतिपालनार्थं कृतं सम्यग् व्यवस्थापनम्। तद्विपुलकर्म्ममयं ममैतद् भूस्वामित्वमनपत्याया मे परलोकगमनात् परमात्मीयभूतं कर्म्मकुशलं त्वामन्तरेण क एव परि-चालयितुं शक्नुयादिति विचिन्त्य विशेषतोऽस्मिन् प्रदेशे सर्व्वजनानां त्वत्-पक्षपातित्वमवलोक्य चात्मनो निखिलसम्पत्तिं स्थायित्वकामनया देव-स्वत्वेन परिणमय्य तस्याः सर्व्वतत्त्वावधानभारं तव हस्ते समर्पयामि। तद्विषयको लेखो हि ममप्रकृतिजनानुमोदितो राजपुरुषस्वाक्षराङ्कित एतत्पत्रसंलग्नः प्रेष्यते। चाणकजनपदात् पुनरत्रैव राजकर्म्मव्यपदे-शेनागत्य पालय भ्रातस्तव चिरानुगृहीतभगिन्या अनुरोधवचनम् तद् राजपुरुषैः सह परामृश्यात्रागन्तुं कृतविलम्बेन त्वया सार्द्धं यदि मे साक्षात्कारो न भवेदिति पत्रद्वारैव पालितमेतन्मम कर्त्तव्यम्।”

लीलायाः पत्रमेतदधिगम्याहो! तस्या एष सुविमलचित्तभावो मदनानलमन्तर्मनाधर्म्येन मया वैपरीत्येन परिज्ञात इत्यनुतप्तहृदय-स्तदीयशेषदर्शनस्याभावात् संव्यथितचित्त आत्मानि स्वल्पैकगतायास्तस्या भ्रातृत्वसम्बन्धमारोपयन् तत्तृप्तये तदीयशेषनिवेदनं कर्म्मणैव परि-पालयितुकाम उच्चतरराजपुरुषेभ्यः पुनर्भयमनसिंहगमनाभिलाषमावेद्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरमदनुकूलानां तेषां समादेशेन सत्वरं लीलास्थानं गतः। जननी-पदमधिष्ठितया लीलया विहीनाः सर्व एव तत्रत्या जनाः पुनर्मामासाद्य हर्षविषादसङ्कुलचित्ता मामभ्यर्थयामासुः। अहञ्च गृहीत-निखिललीलाविषयकर्म्मभारो यावत्कालमात्मनोऽधिकरणिकपदमवाप्स्यत, तावत्कालं द्वे कर्म्मणी एव सम्पाद्येदानीं राजकीयकर्म्मावसानाद् गृहीतवार्द्धक्यवृत्तिः केवललीलाकर्म्मदत्तचित्तस्तत्पवित्रभावेनात्महृदयं यथाशक्त्यापृथ्याविरतं जनहितं साधयन्नमरधामस्थितां तां किञ्चित् परितर्पयितुं पारयामीत्यात्मानं चरितार्थं मन्ये।

(समाप्ता)

शास्त्रसामञ्जस्यम्

(पूर्व्वानुवृत्तम्)

लेखकः महामहोपाध्यायश्रीकैलासचन्द्रकाव्यव्याकरणसांख्यपुराणतीर्थभट्टाचार्य्यः ।

ततः श्रुतमोक्षं मुमुक्षुं प्रत्युच्यते कणादेन "अथातो धर्म्मं व्याख्यास्याम" इति। अथ श्रुतमोक्षस्याधिकारि अतो मोक्षसमन्वारम्भणप्रयोजनाद् धर्म्मं विशेषेणाख्यास्याम इति।

ननु यतो मोक्षनिष्पत्तिः स्यात्तदनाख्याय किमर्थं व्याख्यायते धर्म्म इत्याशङ्कायामाह "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्म" इति यस्मादभ्युदयनिःश्रेयसयोः सिद्धिर्भवति स सर्वो धर्म्म इत्युच्यते।

ननु वेदस्यैकांशे यागादिकमपरांशे च श्रवणादिकमुपदिष्टं तत् सर्वमेव किं धर्म्मजनकमित्याकाङ्क्षायामाह "तद्वचनादाम्नायस्य प्रामाण्यमिति" तस्य धर्म्मस्य वचनादाम्नायस्य प्रामाण्यमङ्गीकृत-मर्थान्मीमांसायां समस्तवेदस्य क्रियार्थकत्वकथनादेव धर्म्मार्थकत्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्रतान्तं नह्यनर्थिका क्रिया वेदोपदिष्टा सम्भवति, तथात्वे ह्यननुष्ठानलक्षणमप्रामाण्यमापततीति भावः।

ननु मिथ्योपलब्धिविनाशस्तत्त्वज्ञानादिति न्यायोक्त्यैव श्रवणादिक्रियायाः सार्थकत्वे सम्भवत्यपि तद्विरोधेन किमिति श्रवणादिजन्यं धर्मान्तरमिष्यते भवतीत्याकाङ्क्षायामाह "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति।

योगजसंस्काररूपादशुक्लाकृष्णाख्याद् धर्मविशेषात् प्रसूतं द्रव्यादिगतसाधर्म्यद्वारेण तत्त्वविषयकं यज् ज्ञानं तस्मान् निःश्रेयसं स्यादिति शेषः। योगजसंस्कारं विना तत्त्वेषु विशेषज्ञानं न सम्भवति श्रवणमात्रात्तेषु सामान्यज्ञानमेव सम्भवति तदपि द्रव्यादीनां साधर्म्यवैधर्म्यद्वारोक्त्यैवोपतिष्ठत इति। मुमुक्षूणां हि योगाभ्यासेनैव वैशेषिकोक्तः परमाणुरेव प्रथमं साक्षात् कर्तुं शक्यस्तस्मादत्र दर्शने मोक्षारम्भकज्ञानकर्मणी उपदिष्टे इत्यत्रोक्तं "समन्वारम्भणाद्" वैशेषिकदर्शनसार्थकत्वमिति।

मोक्षस्य ज्ञानकर्मोभयारभ्यत्वं श्रुतिरपि कथयति। "ज्ञानकर्मणी तं समन्वारभेते इति ततश्चात्र काचिदपि विप्रतिपत्तिः सुधीभिर्नानुसरणीयेति।

इत्थं समन्वारम्भणवतो मोक्षस्य विधानं यत् सांख्यदर्शनस्य विशेषप्रयोजनमुक्तं तत् सांख्यदर्शिनां सुगममेवेति मे प्रतिभाति।

इह हि मध्यमाधिकारिणा ज्ञेयानां सर्वेषां तत्त्वानां सङ्ख्यानं कृतं येषु सांख्यातिनामकं विशेषज्ञानं योगानुष्ठानसाध्यं। ततश्च मध्यमाधिकार्य्यस्य तत्त्वज्ञानस्य सामान्यविशेषभावेन सांख्ययोगोभयदर्शनसाध्यत्वात् तयोरैक्यमपि शास्त्रकृद्भिः परिकल्पितं। तथाच श्रीमद्भगवद्गीतादावेकं साङ्ख्यञ्च योगञ्च यः पश्यति स पश्यतीत्येवमुक्तं तथापि विशेषज्ञानस्य सामान्यज्ञानपूर्वकत्वादस्ति पौर्वापर्य्यानुरोधिनी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमप्राप्ततैव तयोर्दर्शनयोरेवञ्च योगेन विशेषज्ञाननिष्पादनद्वारैव मोक्षो नियम्यते इत्यतो नियमादिति यद् योगस्य विशेषप्रयोजनमुक्तं तदपि सुस्थितमेव। तथापि योगसाध्यो मोक्षनियमः कोदृश इति चेदुच्यते "प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिरिति" सूत्रादनन्तरस्य "ततः क्लेशकर्मनिवृत्तिरिति" सूत्रस्य भाष्ये प्रोक्तं "क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्माद् विपर्ययो भवस्य कारणं, न हि क्षीणविपर्ययः कश्चित् केनचित् क्वचित् जातो दृश्यत इति।

पुनरनिष्टशङ्कारहितायामेतस्यां जीवन्मुक्तावस्थायां निर्वाणापरनामकं कैवल्यमवशिष्यते यदर्थको वेदान्तस्याधिकोपदेशः। जीवन्मुक्तस्यैव ख्यातिवैराग्याधीनकैवल्यापेक्षापि योगेनैव ज्ञापिता। तथा च "सत्त्वपुरुषान्यथाख्यातिमात्रस्य सर्वज्ञातृत्वं सर्वभावाधिष्ठातृत्वञ्च" इति सूत्रादनन्तरं "तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति" योगसूत्रम्।

मैत्र्यादिचित्तपरिकर्म्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः।
ख्यातिञ्च सत्त्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्॥

मित्येवं प्राचीनाः काव्यकर्त्तारोऽपि ख्यातिमत एव वेदान्ताधिकारं प्राहुः।

यथा चास्मिंश्चरमाधिकारे वेदान्तात् ख्यातिवैराग्यं जायते तदप्युच्यते

विष्णोः स्वरूपात् परतोऽहिते ऽन्ये
रूपे प्रधानं पुरुषश्च विप्र!

इत्येवं विष्णुपुराणादुक्तदिशा जड़वित् कारणभावेनैवाद्वयं ब्रह्म वेदान्ते प्रतिपादितं। तादृशब्रह्मज्ञानादेव हि द्रष्टृदृश्यभावनिवृत्त्या निर्व्वाणनिष्पत्तिर्भवति। तस्मात् प्रकृत्यादिकारणवादनिराकरणेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मकारणवादस्य यदु व्याख्यानं साम्प्रदायिकैः प्रवर्त्तितन्तत् सुधीभिरवश्यमेव परिहर्त्तव्यम्। सन्ति हि कारणानां तिस्रः कक्षाः, अन्वहं परमाणुः स्थूलजगतः कारणं, तदादिसूक्ष्मजगतश्च प्रकृतिः, ब्रह्म तु तस्या अपि सचिवः। सुतरां ऊर्द्ध्वाधोभावभिन्नासु कक्षासु यथायथमवस्थितानां कारणानां विरोधशङ्काऽपि न प्रवर्त्तते।

अहो! असत्यामपि प्रतिद्वन्द्विताय़ां कारणानामेकतमसमर्थनायैवान्यतमखण्डनलीला सर्व्वशास्त्रार्थविप्लवकरी विद्वद्भिः कथमिवाभिनन्द्यते यथाधिकारं क्रमशस्तिसृषु कक्षासु प्रविशता योगिना सर्व्वाण्येव कारणानि द्रष्टव्यानि तस्मादेतेषु हानोपादाने कथमपि न सम्भवतः।

तदेतत् सर्व्वं साङ्ख्यकृता प्रकृतिकारणतानिरूपणप्रसङ्गे सम्यगेवोक्तम्"मधिकारत्रैविध्यान्न नियमः" इति सूत्रेण, अर्थात् ब्रह्मकारणत्वमेव सर्व्वैरङ्गीकार्य्यमिति नियमो न सम्भवत्यधिकारिणां त्रैविध्यादतः प्रकृतिकारणत्वमणुकारणत्वञ्चाधिकारभेदादङ्गीकार्य्यमिति भावः। तथा चास्य सूत्रस्य तात्पर्य्यं सुविशदमाघोष्यते, निशम्यतां महात्मभिः—

लोकैर्जगतो निदानमणुरेवापाततो दृश्यते
वस्तुत्वात् प्रकृतिर्हि तैस्तु चरमं दृश्येत तत्त्वैषिभिः।
भाव्यन्तत् परमार्थदर्शिभिरथ ब्रह्मैव शब्दादिति
त्रैविध्यादधिकारिणा न नियमस्तादतः कुत्रचित्॥

तदेवमधिकारभेदानुभवनीयेषु यथास्वकक्षं समवस्थितेषु कारणेषु प्रोच्चण्डखण्डनताण्डवलीलाभिः ऋषिवाक्यानि दलयन्तः साम्प्रदायिकाः कथं श्रद्धेयवचनाः स्युस्तथ्याभिनिवेशिनां विदुषामित्यास्तामेतावदेति।

इत्थं प्रोक्तैर्वेदान्तसूत्रैः षण्णामेव दर्शनानां यदेकं प्रयोजनं सम्यगेव प्रतिपादितं तदेव साङ्ख्यदर्शनस्यापीति साङ्ख्यसूत्रेण संक्षिपादुक्तं यथा "ऊहादिभिः सिद्धिरष्टधा भवतूहादिभिरष्टभिरिति। तदर्थः सुगम एव। किन्तु प्रसिद्धतयैव सूत्रकृतानुल्लिखितान्यूहादीनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कानीतीदानीं दुष्कालवशाद् विचिकित्सनीयानि। तथापि श्रीश्वर-कृष्णकारिकैवात्र कुव्याख्याजालादुन्मुच्य पर्य्यालोचनीया यथा—

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।
दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्व्वोऽङ्कुशस्त्रिविधः॥ इति

कारिकोक्तापि तत्तत्संज्ञामात्रमुपदिष्टं प्रसिद्धेरेव लक्षणन्तु न कृतं। हा हन्त! सा प्रसिद्धिरिदानीमस्तमितैव कथमन्यथा व्याख्यातृभिरगृहीततत्त्वैर्यथेच्छमुपमर्द्दिता दृश्यते। सुतरां प्रोक्त-वेदान्तसूत्राण्यनुसृत्यैव कारिकेदानीं गृहीतार्था क्रियतितराम्।

एवमेव क्रमसम्पन्नाः सिद्धयः क्रमेणैवात्रोपदिष्टाः परिलक्ष्यन्तेऽपि। तथाहि षड्भिर्व्वेदाङ्गैर्जनिता प्रथमा सिद्धिरूहाख्या, वेदजनिता द्वितीया शब्दाख्या ततो मीमांसाजनिता तृतीयाध्ययनाख्या, न्यायजनिता चतुर्थी परिणामविद्योताख्या, वैशेषिकजनिता पञ्चमी तापविद्यताख्या, योगजनिता सप्तमी मित्रलाभाख्या, वेदान्तजनिता चाष्टमी शोधनाख्या इति सर्व्वेषामेव शास्त्राणां प्रकृतपुरुषार्थपरत्वं सर्व्वशास्त्र-कृत्सम्मतमत्रापि देदीप्यते। तत्पर्य्यालोचनाऽभीष्टाऽपि समया-भाव दुपेक्ष्यते। किमु वक्तव्यं भवद्भिः पूर्णो मासोऽपि न दत्तः प्रबन्धरचनायै। तस्मात् षण्णां दर्शनानां सर्व्वेषां सौसामञ्जस्यं प्रसङ्गेन स्रोप्सितमप्यपहाय प्रस्तुतसार्थक्यमात्रं प्रदर्श्येदानीं पाशुपतादिदर्शना-नामपि सार्थक्यं संक्षिप्ततरमुच्यते।

दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः॥
बौद्धा दशसहस्रन्तु तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः।
निर्गुणं पुरुषं प्राप्य कालसंख्या न विद्यते॥

इत्येवं वायुपुराणाद्युक्ताः सर्व्वेषामेव फलानि विभागशः प्रति-पन्नव्यानि। ततो भूतेन्द्रियाभिमानबुद्धिषु लीनाविदेहाख्याः तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथास्त्रं फलं सायुज्यं नाम मुक्तिराख्यायते। ये पुनरव्यक्तलीनास्ते प्रकृतिलयास्तेषां फलं सारूप्यं नाम मुक्तिरिति, चरमोक्तस्य कालसंख्याशून्यस्य निर्व्वाणस्य विवरणम् प्रागेव कृतम्!

शैववैष्णवादीनां तत्तल्लोकप्राप्तिरूपं सालोक्यं मुक्तिश्च पुराणादिषु प्रसिद्धैव। एवं फलविभागे स्थिते पाशुपतदर्शनादीनां फलं शिवसालोक्यं, पूर्णप्रज्ञादीनाञ्च विष्णुसालोक्यमनुमीयते। बौद्धानां बुद्धिसायुज्यं, जैनानां चाभिमानसायुज्यं वैदेह्यभिदस्तथा ये पुनरार्षदर्शनैकदेशिनस्तेषामपि भूतेन्द्रियाद्यन्यतमसमापत्त्या वैदेह्यमेव। किन्त्वेषां मध्ये हटवेदान्तिनां प्रकृतिलयत्वमिति विशेषस्तथाच श्रुतिः—

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रता इति॥

तत्रापि शाङ्करमतानुसारिणां पुनर्व्वैदेह्यमेव बौद्धवत्। तन्मतं प्रच्छन्न बौद्धमिति बहुवैष्णवदर्शनग्रन्थेषु बहुभिस्तान्त्रिकपौराणिकवचनैरपि समर्थितं दृश्यते। दैत्यमोहनार्थकस्य चार्व्वाकदर्शनस्य तु किञ्चिदपि फलं नास्ति उपासनाद्युपदेशाभावात्! "यथाभिमतध्यानाद्वेति" योगसूत्रादुपासनामात्रस्यैव सार्थक्यप्रतिपादनात् खृष्टयवनादीनामप्युपासनाविशेषात् फलविशेषोऽस्तीति ध्रुवमनुमातव्यमेवञ्च सर्व्वकर्म्मविमुखो भोगाभिमुखो नास्तिको नरकं व्रजतीत्यपि निःसंशयमेव पतनस्य नैसर्गिकत्वादुन्नति-शान्त्योश्च कर्म्मज्ञानसाध्यत्वादिति संक्षेपेण सर्व्वाः पुरुषगतयः प्रदर्शिताः।

इत्यम् आस्तिक दर्शनानां यथाकथञ्चित्पुरुषार्थपरतयैकमत्यं नास्तिकदर्शनादेव तद्वैमत्यञ्च चतुर्थप्रश्नस्योत्तरसारमपि मया प्रसङ्गेन प्रकाशितम्। तथा न्यायवैशेषिकयोर्मोक्षस्वरूपमोचारम्भण-रूपार्थवत्त्वस्यैव तत्तत्त्वसारतया षष्ठप्रश्नस्याप्युत्तरं विवृतप्रायमेव!

58　1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलं समयाल्पतयैव प्रबन्धत्रितयं नारब्धं, वस्तुतोऽपि हि चतुर्थ-पञ्चमषष्ठानां प्रश्नानामुत्तरस्यैकगवेषणाविषयत्वात् सर्व्वदर्शनसार्थक्यानीत्येवमेकप्रश्नेनैव भवितव्यमासीत्। गच्छतु तदिदानीं भवताम-न्तिके सविनयमिदं प्रार्थनं यदेतस्य पञ्चमप्रश्नोत्तरप्रबन्धस्य प्रचार-वाहुल्यं क्रियतामिति, तत् कुत इति नानुयोक्तव्यं वहवो हि सुधिय इदानीमार्षवाक्यसामञ्जस्यमेवाभिनिविशन्ते तत्र कैश्चिदार्षदर्शनानां प्रस्थानवाहुल्यं कशीकृतमित्यपि श्रूयते ततश्च मदुक्तदिशा तैस्तदवश्य मुच्छिद्येत नितरां मत्याशा महती मे स्फुरति। भवद्भिः—स्वाधीन ज्ञानाधीनशास्त्रार्थपर्य्यालोचनायां नियुक्तेन मया य एष पञ्चम प्रश्नोत्तर प्रवन्धो विरचितः, तत्रार्षविरोधि विविधसम्प्रदायविदारणात् केषाञ्चिद् यथोपलब्धनिष्ठानां सम्भाव्यमानः प्रकोपो मास्त्वस्मिन्ति चान्तिमं मे प्रार्थनमिति।

परार्थं येऽपार्था अपि परमिहामुत्र सुखयो
स्तथैवाधिव्याधिप्रभृति भूतदुःख प्रतिहतेः।
उपायान् विज्ञानैरुपदिदिशुरज्ञान शमनैः
ऋषिभ्यस्तेभ्यो मे प्रणतिरियमास्तां शिवकरी।

(समाप्तम्)

दुर्गेशनन्दिनी।

लेखक —श्री........

एकविंशतितमः परिच्छेदः।

"स्वप्नसाफल्यम्"

रोगशय्याविलग्ना पितृहीना अनाथा बाला। जगत्सिंहश्च वर्त्तते तस्याः शयनपार्श्वे। दिवसो गच्छति, रात्रिरेति, पुनरपि गच्छति दिनं, समागच्छति निशा। राजपुतकुलावतंसः शुश्रूषते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तामासीनो भग्नपर्य्यङ्कस्य पार्श्वदेशे, अनुतिष्ठति साहायकं तस्या दीनाया निःशब्दाया विधवायाः कार्य्यजातस्य। आधिक्षीणा दुःखिनी सा बाला तं प्रति दृष्टिं व्यापारयति वा न वा; तस्याः शिशिरनिपीड़िते वदनपङ्कजे आगच्छति वा न वा तत् पूर्व्वं स्मितम्, इत्येव द्रष्टुकामः स विलोकयति तस्या मुखं प्रति।

कुत्र वा शिविरः? कुत्र वा तस्य सेना? शिविरभङ्गं विधाय सेना तावत् पाटलिपुत्रमभिप्रस्थिता। कुत्र तस्यानुचराः? दारुकेश्वरतटे प्रतीक्षन्ते प्रभोरागमनम्। कुत्र वा तेषां प्रभुः? स उत्फुल्लयति नयनवारिसेचनेन प्रबलातपविशोषितां कुसुमकलिकाम्।

कुसुमकलिका क्रमशः पुनरुत्फुल्ला जाता। संसारेऽस्मिन् स्नेह एव प्रधान ऐन्द्रजालिकः। व्याधिप्रशमने प्रणय एव प्रधानम् औषधम्। नोचेत् को नाम प्रभवति हृदयव्याधिमुपशमयितुम्? यथा निर्व्वाणप्रायः प्रदीपः तैलबिन्दुसञ्चारेण पुनरपि शनैः शनैः प्रज्वलति, यथा निदाघशुष्का वल्लरी आषाढ़स्य नववारिसेचनेन पुनरपि विकसिता, जगत्सिंहमासाद्य तिलोत्तमा तथा अनुदिनं पुनर्जीवितमिव प्राप्तवती।

क्रमशो बलमासाद्य सा पर्य्यङ्कोपरि उपवेशनसमर्था बभूव। विमलायामसन्निहितायां उभौ सहासीनौ बहुदिवसीयानि मनोगतानि वक्तुमशक्नुताम्। कृताः कति नाम कथाः, क्षान्ताः कति नाम मानसापराधाः, उल्लासिताः कति नाम मनसि उदिता मनसि एव लीना आशाः, कथितास्ते ये नाम मनोमोहनाः स्वप्नाः दृष्टाः जागरणे निद्रायां वा। एकदा विवृतः तया रोगशयनगतया विचेतनया दृष्टः स्वप्नः।

नववसन्तश्रीविराजिते कस्मिंश्चित् क्षुद्रशैले क्रीड़ति सा कुसुमराजिभिर्नरकुमारेण सह। राशीकृतानि वासन्तपुष्पाणि सञ्चित्य ग्रथिता मालिकाः! परिहिता काचित् माला स्वकण्ठे अपरा च जगत्सिंहस्य गलदेशे स्थापिता। छिन्ना सा माला तस्य कटिस्थितस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असेः संस्पर्शेण। "न पुनस्तव ददामि मालां कण्ठदेशे, चरणौ तु निगड़ेन बध्नामि" इत्युक्त्वा रचितस्तया कुसुमनिगड़ः। निगड़ेन बन्धुमुद्यतायां तस्यां नवकुमारोऽपससार। तिलोत्तमापि तमनुजगाम। जगत्सिंहो वेगेन पर्व्वतात् अवततार। तोर्णस्तेन पथि कश्चित् क्षीणो निर्झरः उत्पतनेन। बाला तिलोत्तमा न शशाक उत्पत्य तरितुम्। यत्र निर्झरः सङ्कीर्णतां गतस्तत्रैव तरिष्यति इत्याशया निर्झरतटे परिधाव्य सा अवतरणरता बभूव। दूरमास्तां निर्झरस्य सङ्कीर्णता। यथा यथा सा गच्छति तथा तथा निर्झरः विस्तृतिमेव भजते। क्रमेण निर्झरः क्षुद्रनदीत्वं गतः। क्षुद्रा नदी क्रमेण महानदीत्वं गता। न तावत् दृश्यते जगत्सिंहः। समुच्चा बन्धुरा च तटभूमिः। अतो न शक्यते तत्र पद्भ्यां गन्तुम्। तत्र च पुनः चरणतलस्था तटभूमिः खण्डशः सशब्दं नदीगर्भे पतति। अधश्च प्रचण्डो भीषणो जलावर्त्तः। तिलोत्तमा पर्व्वतं पुनरारुह्य नदीग्रासात् पलायितुमचेष्टत। पन्थाश्च बन्धुरः। न चलति चरणः। सा उच्चैः आक्रन्दत्। सहसा कालमूर्त्तिः कतलुखानः पुनः सञ्जीवितः सन् तस्याः पन्थानं रुरोध। कण्ठस्थ पुष्पमाला सहसा गुरुभारं लौहशृङ्खलत्वं प्राप। कुसुमनिगड़ो हस्तच्युतो स्वचरणे एव पपात। सपदि च लौहनिगड़तां प्राप्य चरणौ बबन्ध। सहसा अङ्गं स्तब्धतां गतम्। तदा कतलुखानः तस्या गलदेशं अवलम्ब्य घूर्णयन् तां नदीगर्भे निचिक्षेप।

स्वप्नकथां समाप्य तिलोत्तमा साश्रुनयना अवादीत्। युवराज, नैष निष्फलः स्वप्नः। त्वदर्थं रचितः कुसुमनिगड़ो मन्ये सत्यमेव स्वचरणयोः लौहनिगड़त्वं गतः।

युवराजस्तदा विहस्य कटिस्थितं असिं तिलोत्तमापादतले संस्थाप्य अवदत्—तिलोत्तमे, तवाग्रतः सञ्जातोऽहम् असिविहीनः। पुनरपि मालिकां प्रयच्छ मे। असिरयं तव पुरत एव द्विधा क्रियते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिलोत्तमां निरुत्तरां समवलोक्य राजपुत्र: समभाषत तिलोत्तमे, न क्रियते मया उपहास:। तिलोत्तमा लज्जया अधोमुखी तस्थौ। तस्मिन् दिवसे प्रदोषकाले अभिरामस्वामी कक्षान्तरे समासीन: प्रदीपालोके पुस्तकपठनव्यापृतस्तस्थौ। राजपुत्रस्तत्र गत्वा सविनयमवादीत्—महात्मन्, निवेद्यते मया किञ्चित्। तिलोत्तमाधुना स्थानान्तरगमनक्लेशम् सहितुं समर्था। किमनेन भग्नगृहवासक्लेशेन श्वो यदि शुभो न भवति दिवसस्तदा मन्दारणदुर्गं नीयतामेषा। यदि पुनर्भवतां न भवत्यनभिमतं तदा अम्बरवंशे दौहित्रीं प्रदाय कृतार्थी क्रियताम एष जन:।

अभिरामस्वामी पुस्तकं परित्यज्य समुत्थाय गाढ़ं सस्वजे राजपुत्रम्। न तावत् लक्षितं तेन पुस्तकोपरि पदं निधाय स तदा स्थित इति।

विमला आसमानी च मनोभावं परिज्ञाय शनै: शनैरनुजग्मतु: स्वामिसकाशमागच्छन्तं राजकुमारम्। श्रुतं ताभ्यां सर्व्वमेव गृहाद्बहिस्तिष्ठन्तीभ्याम्। राजपुत्रो गृहान्निष्क्रम्य ददर्श सहसा पूर्व्वभावप्राप्ताम् विमलाम्। निरन्तरं विहसन्ती सा आसमान्या: केशकलापं छिनत्ति, प्रहरति च ताम। आसमानी प्रहारं तृणाय मत्वा विमलासकाशे नृत्यपरीक्षां ददाति। राजपुत्र: एकेन पार्श्वेन अपससार।

द्वाविंशतितम: परिच्छेद:

समाप्ति:

विकसितं कुसुमम्। मन्दारणदुर्गं गत्वा अभिरामस्वामी साड़म्बरं जगत्सिंहाय दौहित्रीं सम्प्रददे।

परिणयोत्सवे जगत्सिंहेन सहचरा: जाहानाबादात् निमन्त्र्य आनीता:। तिलोत्तमाया: पितृबान्धवा: अपि अनेके आहूता: समागत्य अमोदन्त।

158 2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयेषाया प्रार्थनानुसारेण प्रेषितोऽयं सन्देशस्तत्सकाशेऽपि । आयेषापि पौरजनपरिवृता किशोरवयस्केन स्वसहोदरेण सह समागता ।

यवनकन्यापि आयेषा तिलोत्तमाया जगत्सिंहस्य च स्नेहाधिक्यात् ससखीजना दुर्गान्तःपुरमेव निवेशिता बभूव । पाठक, किं मन्यते भवता न तावत् विवाहोत्सवनिरता बभूव तापितहृदया आयेषा इति ? नैतत् सत्यम । आयेषा सहर्षा चित्तस्य प्रफुल्लतया सर्व्वानेव प्रफुल्लितवती । विकम्पितशारदसरसीरुहमन्दान्दोलनेन इव मधुरस्मितेन सर्व्वत्रैव श्रियं ततान ।

निशीथे विवाहकार्य्यं समाप्तिं गतम् । आयेषापि तदा तदीय सहचरीभिः प्रत्यावर्त्तनोद्युक्ता बभूव । सहास्यं विमलामापृच्छत । अज्ञातवृत्तान्ता विमला सस्मितमवादीत्—नवावकन्ये वयमपि पुनर्भवत्या शुभोद्वाहे निमन्त्रिताः स्यामः ।

विमलायाः सकाशादागत्य आयेषा तिलोत्तमामाहूय कस्मिंश्चित् निभृते कक्षे आनीतवती । तत्करमवलम्ब्य च प्रोवाच—भगिनि, गम्यते मया । कायेन, मनसा वाचा च आशिषं ते प्रयच्छामि—त्वमक्षयेण सुखेन कालं यापय इति ।

तिलोत्तमा पप्रच्छ—पुनरपि कदा भवतीं द्रक्ष्यामि ?

आयेषा प्रत्यभाषत—कथं नाम पुनर्दर्शनाशा क्रियते मया ।

तिलोत्तमा विषादं गता । उभे एव नीरवतां भेजतुः ।

क्षणान्तरे आयेषा प्रोवाच—दर्शनं पुनर्भवतु वा न वा, न तावत् विस्मर्य्यतामायेषा ।

तिलोत्तमा विहस्यावादीत्—आयेषां विस्मृतायाः मे मुखं न निरीक्षिष्यते राजकुमारः ।

आयेषा धीरमुवाच—नाहं तुष्यामि अनेन वचनेन । न त्वं कदापि युवराजसमीपे मद्विषयकं वाक्यमुत्थापय । अङ्गीक्रियतामेतत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिज्ञातमायेषया जगत्सिंहस्यार्थे आयेषया सर्वसुखं परित्यक्त-मिति तु जगत्सिंहस्य हृदये शल्यमिव विद्धं तिष्ठति। आयेषा-प्रसङ्गमात्रमपि तस्य अनुतापकरं भवेदिति।

उररीकृतमेतत्तिलोत्तमया। आयेषा पुनरुवाच—अथापि न विस्मर्तव्योऽयं जनः। यच्च चिह्नं प्रदीयते स्मरणार्थं तत् मा तावत् प्रत्याख्यायताम्।

एवमुक्ता दासीमाहूय आदिदेश। दासी आज्ञानुसारेण गजदन्त-विनिर्म्मितमञ्जूषामध्यस्थं रत्नालङ्कारजातम् आनिनाय। आयेषा दासीं विसृज्य तदलङ्कारजातं स्वहस्तेनैव तिलोत्तमां परिधापयामास।

राजकन्यापि तिलोत्तमा तेषामलङ्काराणाम् अङ्गशिल्पकौशलं तन्मध्यवर्त्तिनां हीरकादिरत्नराजीनां असामान्यां समुज्ज्वलदीप्तिं विलोक्य विस्मिता बभूव। आयेषा पितृप्रदत्तानि निजाङ्गभूषणानि विलोप्य तिलोत्तमायाः क्षते कारयामास अनन्यदुर्लभान्येतानि रत्न-भूषणानि। तिलोत्तमायामेतेषां प्रशंसां ख्यापयन्त्यामायेषा प्रोवाच—भगिनि मा तावत् प्रशस्यन्तामेतानि। त्वयाद्य परिहितं यद्रत्नं हृदय-मध्ये न खलु एतानि सदृशानि तस्य चरणरेणोरपि।

एवं वदन्ती आयेषा महता क्लेशेन नयनजलं संवृतवती। तिलोत्तमा किञ्चिदपि ज्ञातुं न शशाक।

समाप्ते अलङ्कारसन्निवेशे आयेषा तिलोत्तमाया हस्तद्वयं विधृत्य मुखं प्रति दृष्टिं व्यापारयामास। मनसि च चिन्तयामास ईदृशं सरलं प्रेमप्रतिमं मुखं निरीक्ष्य मन्ये प्राणेशः कदापि न प्राप्स्यति मनः-पीड़ाम्। यथा विधातुरन्यादृशी इच्छा न जाता, तथा तच्चरणे एषा मे भिक्षा, अनया एव तस्य चिरसुखं सम्पादयेदिति।

तिलोत्तमां प्रोवाच च - तिलोत्तमे, गम्यते मया। तव स्वामी कार्य्यव्यापृतो भवेत्—अतो न तावत् तदामन्त्रणार्थं क्रियते काल-हरणम्। जगदीश्वरो वः दीर्घायुषौ विदध्यात्। परिधातव्यानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गेषु मया प्रदत्तानि रत्नानि। अन्यच्च—मम—तव रत्नश्रेष्ठं स्थापयितव्यं हृदयमध्ये ।

तव रत्नश्रेष्ठमिति वदन्त्यास्तस्याः सञ्जातः कण्ठरोधः । तिलोत्तमा ददर्श आयेषाया नयनपल्लवे जलभारस्तम्भिते कम्पेते इति ।

तिलोत्तमा समदुःखा इव पप्रच्छ—कथं नाम रुद्यते त्वया ? सपदि आयेषायाः नयनवारिस्रोतो निरन्तरमवहत् ।

आयेषा पुनः पलार्द्धमपि अविलम्बा द्रुतं गृहं परित्यज्य शिविकामारुरोह ।

आवासगृहमुपगताया आयेषायाः रात्रिर्न प्रभाता । आयेषा वेशं परित्यज्य शीतलपवनपथे कक्षवातायने तस्थौ । तस्याः परित्यक्तवसनाधिककोमले सुनीले गगनमण्डलमध्ये लक्षं तारकाः जाज्वलन्ते । मृदुपवनतरङ्गेण अन्धकारस्थानात् वृक्षाणां पत्राणि मुखरितानि । दुर्गशिखरे पेचको गम्भीरं निनदति । पुरतो दुर्ग प्राकारमूले, यत्र आयेषा तिष्ठति तत्रैव अधः, जलपूर्णा दुर्गपरिखा नीरवं आकाशपट प्रतिबिम्बं विधृत्य वर्त्तते ।

आयेषा वातायनासीना सुचिरं चिन्तयामास । अङ्गुलीतोऽङ्गुरीयकं गरलाधारं उन्मोचयामास । एकदा मनसा वितर्कयति निवारयितुं शक्नोम्यहं सर्वां तृष्णां एतद्गरलपानेन । अन्यदा पुनर्विमृशति—किम् एतदर्थमेव प्रेषिताहं विधात्रास्मिन् संसारे ? कथं मया गृहीतं नारीजन्म, न चेत् सोढुं समर्थाहम् एतां पीड़ाम् ? किमथवा श्रुत्वैतत् जगत्सिंहः कथयिष्यति ?

पुनरपि अङ्गुरीयम् अङ्गुल्यां संनद्धम् । भूयोऽपि किमपि विमृश्य अपनीतम् ।

विममर्श च — दुःसंवार एष लोभो रमणीभिः ।

एवमुक्त्वा आयेषा गरलाधारं तदङ्गुरीयकं दुर्गपरिखासलिले निचिक्षेप ।

(समाप्ता)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलदमयन्तीयम्

लेखकः—श्री

विदू—साधु वयस्य साधु, कोऽन्यस्त्वामन्तरेण मन्दारकस्य सुखं दुःखञ्च जानाति ? तदिदानीं काननविहारो मे महति सुखाय कल्पते, एहि तावत् पारिजातकुञ्जमञ्जुलतरं विकसितवञ्जुलरसालकुरुवक-गन्धराजवकुलपादपैरुपशोभितं मालतीमल्लिकामाधवीवल्लीसमलङ्कृतोपकण्ठं मलयमारुतोल्लासितप्रसूनसौरभं विलासोद्यानम् इदमभितो विहृत्य मानसं परितर्पयावः। (परिक्रामतः)

राजा—वयस्य, मन्दारक, जानास्येव मे हृदयावस्थां, सम्प्रति मम हि—

वहिरेव कुसुमसुषमा हृदयं तिमिरैः समाच्छन्नम्।
क्षितिधरगह्वरगेहं लग्ने वहिरातपे यद्वत् ॥

तदनेन वनविहारेण प्रतिक्षणप्ररूढप्रियास्मृतिरनीशोऽस्मि सुखमखण्डमुपभोक्तुम्। क्षणे क्षणे समुदेति मानसे मैव मे मनोरथभूमिः। तथाहि मन्ये—

सुषमा कुसुमनिरूढा यदि दयिता सा भवेदस्मिन्।
काञ्चनमिव मणिवद्धं वनमिदमद्या वसन्तीयम् ॥

वयस्य, किंवा बहुलमावेदयामि—

विना तल्लावण्यं वितथ इव वल्लीसमुदयो
विना तस्याः स्पर्शं कुसुममपि नो सार्थकजनुः।
अलं वा पुष्पाणां ललितरचना पादपतले,
न चेत् पद्मं नीरे कथमिव तदीयस्तुतिकथा ॥

विदू—भो वयस्य, किमिति अदृष्टैव तत्रभवतीं विदर्भराजनन्दिनीम् एवं विमुग्धोऽसि ? अहन्तु कुमारसदृशाकारे भवति दर्शनोत्तरमेव परं स्नेहं विन्दे, तत् कीदृशोऽयं ते मोहमहिमा ?

राजा—वयस्य, मा मैवम्, कुतः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्रे पुरा चतुरचित्रकरोपनीता
सा चित्ततस्कररुचिः प्रविलोकिता मे।
तस्मात् परं मनसि कल्पनया प्रणीय
तन्मूर्त्तिमस्मि सुतरां परिमोहितात्मा॥

विदू—वयस्य, नेदं न जानामि, तथापि कथयामि नास्ति ते परमार्थविवेक इति।

राजा—वयस्य, कथमिव?

विदू—अपि नेदं जानाति भवान्, यथा चतुरचित्रकारिणो रमणीयता-मतिमात्रामुद्भावयितुकामा अनुकार्य्यं सौन्दर्य्यं परिवर्त्त्य चित्रे प्रदर्शयन्ति, तदत्रापि न तथा प्रस्तुतमिति को वा ब्रूयात्?

राजा—वयस्य, मन्दारक! न परमार्थं जानासि, कुतः?

नैपुण्यं यावदेवास्तु शिल्पिनां शिल्पकर्मसु।
अनुकार्य्यस्य लावण्यान्निकृष्टानुकृतिश्चिरम्॥

विदू—राजासनमध्यासीनानां चित्तवृत्तिरिदंदर्शिनी, अस्माकन्तु दीनब्राह्मणानां नैवं प्रतिभाति।

राजा—वयस्य, कथं वा न प्रतिभायात्? तथाहि पश्य—

अभिनयकुशलानामुत्तमानां नटानाम्
अपि बहुविधभावाभासदानव्रतानाम्।
अविकलमनुकार्य्यावस्थया नो विधानम्,
स्वहृदयपरिबोधस्तत्र तु स्यात् प्रमाणम्॥

विदू—यद्येवं तदा वञ्चितोऽसि नूनं निपुणतमानां शैलूषाणामभि-नयदर्शनव्यापारेण, तथाहि श्रूयताम्—लोके प्रायेण प्रतिदिनमुपजाय-मानमेव दृश्येषु निपुणनटैरभिनीयमानं रसान्तरमुत्पादयतीति।

राजा—वयस्य, यद्यपि तथा तर्कप्रसादलब्धजन्मना निश्चयेन चित्र-लेखापेक्षया विदर्भनन्दिनी निकृष्टैव स्यात्, तथापि विपुलायामस्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसुन्धरायां अनेन चित्रलेखेन यैव सुसदृशी, सैव मे मनोरथभूमिः, कथमिति ?

आदौ दृष्टा चित्रशिल्पे मया या,
सैवाभून्मे रागपात्रं मह्योयः ।
सा चेद् भैमी तत्र मे चित्तरागः,
सा चेदन्या तत्र मे चित्तरागः ॥

विदू—उन्मत्त, नेदृशं लावण्यं विधातुः शिल्पं स्यात् ।

राजा—वयस्य, महति भ्रमान्धकारे पतितोऽसि, तथाहि पश्य—

यो धाता नलिनीदलानि तनुते वामन्तवापीजले,
यो वा चान्द्रमसीं रुचिं रचयते पर्व्वण्यपूर्व्वात्मिकाम् ।
यो वा नूतनपल्लवेषु कुरुते दिव्यप्रसूनस्रजं,
सोऽयं तादृशरूपसाधनविधौ किं नो समर्थायताम् ॥

अपिच—

अंशतो लक्षिता विद्या वालकानां परीक्षणे ।
सर्व्वविद्यासमुत्कर्षमनुमापयते ध्रुवम् ॥

विदू—(मुखभङ्गीं नाटयन्) हुम् ! सर्व्वविद्यासमुत्कर्षमनुमापयते ध्रुवम् ! अथ भवन्तं पृच्छामि, यदि एकदेशदर्शनेन वस्तूनां सर्व्वविज्ञानमङ्गीकरोषि, तदा मम इमां भुजङ्गकुटिलां यष्टिमपि सरलामवेहि ।

राजा—कथमिव ?

विदू—यतस्तावत् अस्या अपि पाददेशात् प्रभृति चतुरङ्गुलं स्थानं सारल्येन तवैव हृदयमनुकुरुते ।

राजा—वयस्य, वृथैव मे चित्तवृत्तिं तर्केण पराभवितुमीहसे,

कुतः— दिङ्मोहस्तर्कयुक्तिभ्यां नापक्रमति चेतसः ।
अपरोक्षपरिज्ञानं यावन्नोदेति देहिनाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदू—(स्वगतम्) अहो अस्य निर्व्वन्धः! तावतापि प्रयत्नेन न शक्यते मानसमस्य परिवर्त्तयितुम्, तत् किमिदानीं करिष्ये? भवतु अन्यतः सञ्चारयामि। (प्रकाशम्) भो वयस्य, अनार्य्याः खल्वमी पादपाः, ये चित्तनिर्वृतिमुपपादयितुं भवता समाश्रिता अपि सुतरामनिर्वृतिमिव भवतः समुपदिशन्ति, तदेहि यावत् इमाननार्य्यानपहाय मलयानिलनर्त्त्यमानतरङ्गसम्पातमधुरस्य तीरतरुस्खलितप्रसूनरसबिन्दुचन्द्रकालङ्कृततटोपान्तसलिलस्य धवलमरालमालासञ्चरणजटिलस्य दाड़िमसरोवरस्य मणिमयसोपानिकायामुपविश्य शीतलमलयानिलेन शरीरं मानसञ्च परितर्पयावः।

राजा—वयस्य, किमिति मुधैव पादपानधिक्षिपसि? अनपराधाः खल्वमी प्रकृते वृत्ते, तथाहि दुःसाध्येन आमयेन परिपीड़िते यदि नोपकुर्व्वन्ति भेषजानि तत्र को वापराधो भेषजानाम्, वयस्य, मन्ये सम्प्रति सर्व्वार्थनिष्पादनसमर्थः कल्पवृक्षोऽपि नितरामसमर्थायते मे मनोवेदनामपनेतुम्। तदलमेतानुपालभ्य, कुतः?

पुष्पोपहारपरिशोभितकुञ्जपुञ्जे
छायातरुप्रकरशोभिवनोपकण्ठे।
सङ्कल्प्य काममपि मदं पुरतः प्रपन्नः,
सत्यं मदीयदुरितेन विपर्य्ययोऽद्य॥

विदू—(साधिक्षेपम्) कथं वा नोपालभेय? यतो मूढ़ाः खल्वमी महीरुहा न जानन्ति बहुमानं महीपतीनाम्। येन किल एवमेतानपेक्षमाणेऽपि सकलापेक्षणीये भवति निरपेक्षा एव समुपलक्ष्यन्ते, तद् वयस्य, क्षणं प्रतिपालयस्व, यावदेताननतिमूढ़ान् बहुग्रन्थिकठोरेण तैलाभ्यङ्गगृहीतसारेण कुटिलकुटिलेन दण्डेन समुद्बोधयामि।

(आहन्तुमुपगच्छति)

राजा (निरुध्य) वयस्य, मा मैवम्, नैते भाजनमाक्रोशस्य येन बहिश्चेतनेष्वेव आक्रोशः फलं प्रसूते, नान्तश्चेतनेषु।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदू—तदास्ताम्, एहि सम्प्रति मणिसोपानिकामाश्रयावः।

राजा—एवं भवतु (परिक्रम्य उभौ मणिसोपानिकायामुपविशतः)

विदू—भो वयस्य, पश्य पश्य अमीषां तरङ्गाणां विनयवर्त्तिताम्, एते हि सुदुर्लभदर्शनं त्वां मणिसोपानिकायामुपलभ्य पादक्षालनमिव कारयितुकामाः पादोपकण्ठमुपसर्पन्ति, तदितोऽप्यधस्तादवतीर्य परिपूरय मनोरथं तरङ्गबान्धवानाम्। (राजानं करे गृहीत्वा अवतारयति)

राजा—वयस्य, मनोज्ञेयं सौन्दर्यपरम्परा तरलतरङ्गसञ्चारिण्या वापिकायाः, तथाहि

मृदुलपवनयोगाद् भग्नकायैस्तरङ्गैः
सुललितसलिलेयं वापिका सम्पतन्ती।
प्रणयरुचिरचेता नायिकेव प्रसन्ना
द्रवयितुमुपतापं यत्नसीमां दधाति॥

विदू भो वयस्य, इतोऽपि पश्यतु भवान् मलयानिलसञ्चालितायां कमलदयितायां दशाविशेषं मधुव्रतस्य।

राजा—वयस्य, एवं पश्यामि, शोच्यस्तावदयं मधुव्रतस्तपस्वी, महतीमिव दुरवस्थामनुभवति, तथाहि

पातुं मधूनि विपुलं विदधत् प्रयत्नं
भृङ्गो यदैव परिसर्पति पङ्कजिन्याम्।
हा हा तदैव च समीरसमीरिताङ्गः
शून्ये समुत्पतति लूनमनोऽभिलाषः॥

विदू—भोः! अधमस्तावदेष धूर्त्तमधुव्रतः, येन एवमसकृत् प्रतिषिध्यमानोऽपि एनामेव अनुवर्त्तमानो दृश्यते, तदुच्यतामेष धृष्टः, अलमस्याः पुनरनुबन्धेनेति।

राजा—वयस्य मन्दारक, न कदापि परिप्राप्तोऽसि तथा रागगोचरतां, येनैवमभिधत्से, पश्य,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणयो विदितनिषेधो द्विगुणीकुरुते मनोभावम्।
अचलनिरुद्धस्रोतास्तरङ्गिणी तीव्रतां धत्ते॥

विदू-(स्वगतम्) अये अनेन वृत्तान्तेन मसुपचितम् आत्मापि प्रियवयस्येन। तद् भवतु एवं तावत्। (प्रकाशं) भोः वयस्य, किमिति पदे पदे तामेव अविदितगुणविशेषां अधिकृत्य आत्मानं खेदयसि? परिह्रीयतामेष दुरन्तो भावानुबन्धः. दृश्यन्तामेतानि मृदुलभुजलताललितानि तरङ्गितवापीसलिलानि, घनचन्दनगन्धबन्धुराणि मन्दसमीरणस्पन्दनानि, मदनगीतिकापर्य्याकुलेन मधुकरपटलेन असकृदनुबध्यमानानि विकचसरसीरुहाणि, आतपत्रानुकारिकमलदलान्तरालगतानि मनोहराणि च विलासवन्ति चक्रवाकमिथुनानि।

राजा-वयस्य, मन्दारक, किमेतानि मया न दृश्यन्ते? एतान्येव साभिनिवेशं दृश्यमानानि जीवनं मे धारयन्ति, कुतः?

वीचिश्रेण्यां ननु भुजलतामार्दवं मे प्रियायाः,
पद्मोत्सङ्गे करचरणयोः सौष्ठवं सन्निधत्ते।
शैवालेषु स्फुरति मसृणा केशपाशस्य शोभा,
हंसे सौम्यस्मितसुभगता पद्मवन्धे च गन्धः॥

विदू-(स्वगतम्) यथा हि कुक्कुरविषवेगपर्य्याकुलः सर्व्वं कुक्कुरमयं पश्यति, तथैव एष दमयन्तीपर्य्याकुलो जगदेव तन्मयं पश्यति, तत् किमत्र प्रतिविधेयम्?

वातः पद्मदलानि संविघटयन् प्राणप्रियादूतवत्
पद्मिन्या हृदयस्य वृत्तिनिबद्धं वक्तीव मामञ्जसा।
क्रीड़ाकौतुकिनीव चञ्चलजला वापी प्रियं मारुतं
मिञ्चन्ती जलशीकरैः प्रियकथास्तोमानिवोत्कण्ठते॥

विदू-भो वयस्य, यदि केवलं प्रतिपदं तामेव स्मरन् विह्वलं नाटयेथास्तदा नाहं ते सहचरो भवितुमर्हामि, (मुखं परावर्त्य निपुण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्यतो दृष्ट्वा) भो वयस्य, येयं मरालमालापर्य्याकुला नातिदूरवर्त्तिनो नीरोपान्तभूमिः तत्र दृष्टिं देहि।

राजा—किं निमित्तम्? (दृष्टिं ददाति)

विदू—तस्या एव भूमेरुपरिष्टात् सुविशुद्धकाञ्चनप्रायं किमपि दृश्यते, अदृष्टपूर्व्वमिदं, तत् किन्नु खलु स्यात्? अपि भवतैव मानस-सरोवरशोभामतिशयितुकामेन केनापि निपुणशिल्पिना काञ्चनमयशत-पत्रं कारितम्?

राजा—नहि नहि अहमपि भवानिव साम्प्रतमेव प्रथमदर्शी।

विदू—तत् केनानेन वस्तुना भवितव्यम्!

राजा—(आलोकयन्) वयस्य, अहं हि जानामि

या माधवी स्त्रीस्त्रिदिवे विहृत्य,
मन्दाकिनीकाञ्चनपद्महस्ता।
समेत्य वापीसलिले निलीना
तदीयपाणिस्खलितं किलैतत्॥

अथवा— आवर्त्तानिलचालिता कमलिनी किञ्जल्कमालाघना,
मन्दस्पन्दितरङ्गसङ्गतिवशात्तीरोपकण्ठं गता।
प्राचुर्य्यात् परिपिण्डिताङ्गरचना स्वर्णायमानद्युतिः,
तद्रागादिव हंसपङ्क्तिरमला तत्पार्श्वतो राजते॥

विदू—यथा तथा भवतु, यावत् समीपमुपसृत्य विगतशङ्को भवावः

राजा—एवं क्रियताम् (उभौ सोपानादवतीर्य्य पश्यतः) वयस्य, अपि पश्यसि?

विदू—अथकिम्। (निपुणं निरूप्य सहर्षम्) भो वयस्य, दिष्ट्या वर्द्धसे, एष नूनं काञ्चनखनिसम्भूतः काञ्चनशैलाङ्कुरः प्रादुर्भवति, तदत्र वयस्यः प्रमाणम्।

राजा—(स्मितं कृत्वा) वयस्य, तत्त्वविमुग्धो भवानन्यथैव कल्पयते, नायं काञ्चनशैलाङ्कुरः, परं कश्चन काञ्चनमयो मरालयुवा मलयानिल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पर्करम्ये तीरोपकण्ठे गाढ़ं निद्रासुखमुपभुङ्क्ते। तथाहि

परांङ्मुखं मस्तकमात्मदेहे,
प्रविश्य सङ्कोचितकीर्णपक्षः।
एकं पदं कुक्षिगतं दधानः,
सन्दृश्यते नूनमसौ विहङ्गः॥

विदू—कथमयं सचेतनो जीवः? मम तावदयं अचेतनः पिण्ड-भूतः प्रतिभाति। तत् किमत्र प्रमाणमनुसन्धत्से।

राजा—वयस्य, पश्य प्रमाणं—एतस्य खलु

उच्छ्वासनिश्वासवशाच्छरीरे,
प्रसारणाकुञ्चनयोः प्रकाशः।
प्रभञ्जनोत्पातवशात् कदाचित,
शीर्षे पदे पक्षयुगे च कम्पः॥

विदू—वयस्य, यद्येवं तदा अपूर्वमिदं प्रमोदस्थानं, नहि ताव-न्मात्रेण तृप्तिं जनयति, तद् गच्छ विन्देनं नेत्रसुखलाभाय।

राजा—करेण गृहीतो यदि कष्टातिशयमयं गच्छेत्, तदा महत् पातकं सम्पद्येत।

विदू…किमेतन्मात्रेण परमानन्दो वर्जयितव्यः, स्वर्गमुद्दिश्य प्राणिहिंसनमिव नेत्रहृदये मरालस्य स्वल्पमात्रं संयमनकष्टमुपेक्षणीय-मस्माभिः।

राजा…भवतु यावदेनं शिथिलपाणिस्पर्शेन ग्रहीष्यामि, यथास्य गृहीतस्य न शरीरपीड़ा भवेत्।

विदू…का हानिः, यथा कथञ्चन कार्य्यसिद्धिरावश्यको नाम। तद् गच्छ, अलं विलम्बेन।

राजा…वाढ़ं, एष गच्छामि। (गच्छन् दक्षिणवाहुलोचनयोः स्पन्दं सूचयन्) अये! किमिदम्!

वामितरभुजस्पन्दः स्फुरितं दक्षचक्षुषः।
किमकाण्डे इयं प्राप्तं फलसम्भावना कुतः?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्देशाः

मासिकाधिवेशनं सम्पादकाभिनन्दनं च विगत-सौरचैत्रस्य चतुर्विंशे वासरे मायं कलिकाताराजकीयसंस्कृत-विद्यामन्दिराध्यक्षपादानां श्रीमतामादित्यनाथमुखोपाध्यायदर्शन-सागर एम्, ए, पि, एच, डि महोदयानाम् आध्यक्षेण समपादि परिषदश्चैत्रमासिकं साधारणमधिवेशनम्। तत्र सभापतिवरण-पूर्व्वसभाविवरणवाचन — नवीनसदस्यनामकीर्त्तनादिषु समाप्तिं गमितेषु अधिवेशनाद्यकृत्यजातेषु निर्द्धारिता आगामित्रायनीयपरिषत्कृत्य-सम्पादकाः। ततश्च परिषदन्यतरसम्पादकानां श्रीमतां पशुपतिनाथ शास्त्रि एम्, ए, बि, एल् महोदयानां कलिकाताविश्वविद्यालयतः पि, एच्, डि, इति गौरवजनकोपाधिलाभमुपलक्ष्य तस्मै अभिनन्दनादिकं किमपि विसृष्टम्। तथाचादौ परिषदन्यतरसम्पादकश्रीयुक्त गोष्ठपतिरायचतुर्धुरीणकाव्यतीर्थमहोदयेन वाचिताः केचन परिषदानन्दातिरेकगर्भाः शास्त्रिमहोदयदीर्घजीवनकामनात्ताः पट्टवस्त्रखण्डोपरि चातुर्य्यगरिम्णा मुद्रापिता रमणीयरसणीया भावगम्भीरा अधस्तनाः श्लोकाः उपहृतञ्च तत् वस्त्रखण्डं शास्त्रिमहोदयाय। अथ क्रमेण श्रीमता वामाचरणकाव्यतीर्थेन परिषच्छात्रसमितिप्रतिनिधिभूतेन श्रीमता चिन्ताहरणचक्रवर्त्तिना च वाचितं श्लोकगर्भमभिनन्दनपत्रद्वयं, यन्नाम वाचनादनन्तरमुपहृतं शास्त्रिमहोदयाय। ततश्च श्रीमता सतीशचन्द्र-चक्रवर्त्तिना पठितं वङ्गभाषामयश्लोकात्मकं किमपि अभिनन्दनपत्रम् यदपि च पठनानन्तरमुपहारीकृतं अभिनन्द्यमानेभ्यः श्रीमद्भ्यः शास्त्रि-पादेभ्यः।

एवमवसिते अभिनन्दनपत्रवाचनरूपे अभिनन्दनप्रधानाङ्गे सभाध्यक्ष-महोदयाः, परिषत् सभापतिमहामहोपाध्यायश्रीयुक्तप्रमथनाथतर्कभूषणपादाः, श्रीमन्तः शितिकण्ठवाचस्पतिपादाः श्रीमन्तो ललितकुमार-मित्रमहोदयाः श्रीमन्तः शरच्चन्द्रखान्महाशयाः श्रीमन्तस्ताराचरणा युर्व्वेदशास्त्रिणश्च शास्त्रिमहोदयानां विविधगुणनिचयसमुपवर्णन-

60 1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरःसरम् उपाधिलाभे तेषां सम्यगुपयोगितां विश्वविद्यालयाधिकृतानाम् तेभ्य उपाधिप्रदानविधौ गुणग्रहणपाटवं च समालोचयन्तः मधुरमधुरां वाक्यावलीं प्रवर्त्तितवन्तः। समाप्तिं प्राप्तासु च तासु वाक्यप्रवृत्तिषु श्रीयुक्तपशुपतिनाथशास्त्रिमहोदयाः अभिनन्दनस्य सम्यगुत्तरप्रदानावसरे विनयमधुरां वक्तृताम् काममप्यारचयामासुः।

ततः सभाकृत्यसम्पादने सभापतिमहोदयानां क्लेशराशिमुल्लिख्य स्वतो धन्येभ्योऽपि तेभ्यः पिष्टपेषणन्यायेन केचन वितीर्णाः साधुवादाः। एतदनन्तरं परिषत्सदस्यैः पल्लवकुलतिलकभूतानां श्रीमतां महेन्द्रविक्रमनरपतिमहोदयानां कृतिर्मत्तविलासम् परिषच्छात्रसमितिसदस्यैश्च महाकवेर्भासस्य मनोहरं वस्तु मध्यमव्यायोगश्च प्रयुक्तौ परिषद्रङ्गमञ्चे। अभिनयस्य पाटवन्तु अन्तं यावत् तिष्ठद्भिर्निखिलैर्दर्शकवर्गैरेव प्रमाणीकृतं तत्र नापेक्ष्यतेऽस्माकं प्रशंसावादः। अभिनयान्ते च रात्रेर्दशम घटिकायामवसितं निखिलं सभाकृत्यम्।

तत्र सभायां वाच्यत्वेन पूर्व्वमेव निरूपितः श्रीमत उपेन्द्रनाथसेनगुप्तकाव्यतीर्थस्य 'विविदिषा' इति प्रबन्धः। प्रबन्धविषयस्य गुरुत्वात् दीर्घत्वाच्च तस्मिन् दिवसे बहुकृत्यानां सम्पादनीयत्वान्न वाचितम्। निर्णीतञ्च यदेष आगामिनि अधिवेशने वाचयिष्यते इति।

परिषदभिनयः—

विदाङ्कुर्व्वन्तु श्रीमन्तः परिषत्सदस्याः परे च संस्कृतानुरागिणो विद्वांसः इतःपूर्व्वं परिषत्सदस्यैः कविचूडामणिर्भवभूतेरुत्तररामचरितं नाम नाटकमचिरमभिनीतं भविष्यतीति वार्त्ता प्राचरत्, परमिदानीं कारणान्तरेण पुनः प्राचीनकवेर्भासस्य बालचरितमभिनीतं भविष्यतीति निर्द्धारितं वर्त्तते। अभिनयोपयोगिशिक्षा प्रारब्धा, सत्वरमेव सन्नद्धा अभिनेतारः साधारणानामानन्दमनुकूलयितुमात्मनैपुण्यं बालचरितमधिकृत्य प्रकाशयिष्यन्ति, भासस्य ग्रन्थेषु यथा अभिनयसमुत्कर्षः सम्पादयितुमलं न तथा कवीनामपरेषामिति दृष्टचरमेव निपुणदर्श-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कानां तदिदमन्यतमं सविशेषं कारणं प्रक्रान्तवस्तुपरित्यागेन भासनाटकममवलम्बते इति विज्ञाप्यते।

परिषच्छात्रसमितिः—

विदितमस्तु तत्रभवतां परिषत्प्रियमहोदयानां यथा संस्कृतभाषाविज्ञान-समुन्नतये कृतपरिकरायाः संस्कृतसाहित्यपरिषदः कार्यानुकूल्यविधानाय शैशवादेव छात्राणां संस्कृतविद्यादक्षतायामभिनिवेशसम्पादनाय तथा वाक्पाटवादिप्रतिबन्धकीभूतभीत्यादिपरिहारेण यथोचितवाग्विभवसमुन्मेषणाय विविधोन्नत्युपायसङ्कलनार्थञ्च प्रतिष्ठापिता नातिचिरं काचित् छात्रसमितिः परिषद्भवने परिषच्चतुष्पाठीसम्पर्कं साक्षात् परम्परया वा प्राप्तवद्भिः कतिपयैः समुत्साहिभिर्बालैः। ते इतःपूर्व्वं परिषदो रङ्गालये सुतरां चातुर्य्येण परिषदाचार्य्यश्रीकालीपदतर्काचार्य्यप्रणीतं स्यमन्तकोद्धारं नाम व्यायोगं तथा लब्धप्रतिष्ठप्राचीनकविचूड़ामणिभासस्य मध्यमव्यायोगं नाम रूपकमभिनीय परिषत्सदस्यानामितरेषाञ्च गुणग्राहिणां मानसानि परमन्वरञ्जयन्। सम्प्रति पुनस्ते भासस्य कर्णभारं नाम रूपकं तथा भट्टनारायणकवेर्वेणीसंहारनाटकस्य तृतीयाङ्कमभिनेतुमुद्यममातिष्ठन्ति। प्रायेण प्रत्यहमेव तेषां साग्रहमनुशीलममस्माकमभिनयोत्कर्षसम्भावनामुद्दीपयति, आशंसामहे यथा पूर्व्वमिव साम्प्रतमपि ते यथापरिश्रमं फलमधिगमिष्यन्ति। एवंक्रमेण हि सम्प्रदायाविच्छेदः सम्पद्यते लोके, दृष्टप्रकर्षास्तावत् परिषत्सदस्या नानाविषयेषु, तेषामनुकृतिकामनां हृदये दधानाः सुनिपुणाश्छात्रसमितिसदस्या यदि वर्त्तेरन्, तदा तेषामपि तथैव प्रकर्षसमुत्पत्तिस्तदनन्तरं तदनुकरणेन परेषां तदनुकरणेन च इतरेषामित्येवं सम्प्रदायो निर्व्विरोधं रक्षितः स्यात्। वयमीश्वरसमीपे नातिचिरमुद्भूतायाः परिषदाशास्थानभूताया अस्याः सुदीर्घं निरामयञ्च जीवनमभिकामयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

08056৯

আপনার পারিবারিক ঔষধের বাক্সে

পণ্ডিত ক্ষীরোদপ্রসাদ বিদ্যাবিনোদ মহাশয়ের আবিষ্কৃত

লাইমোডাইন

আছে কি? যদি না রাখিয়া থাকেন, তবে লাইমোডাইনের অভাব অনুভূতি করিতেই হইবে। কেন না—ক্ষুধামান্দ্য, অপরিপাক, কোষ্ঠকাঠিন্য বা পাতলা দাস্ত, অম্লশূল, ডিস্‌পেপসিয়া প্রভৃতি প্রত্যেক পরিবারের নিত্যনৈমিত্তিক ব্যাপার

আর এই—

অপরিপাক ও ডিস্‌পেপসিয়া—

ইহাতে ম্যালেরিয়া, কালাজ্বর প্রভৃতি পুরাতন পীড়াসকলের পরাক্রম বৃদ্ধি হয় এইরূপ জ্বর তাড়াইতেও একমাত্র লাইমোডাইন ব্রহ্মাস্ত্র।

প্রতি শিশি ১৲ টাকা।

নিউ ইরা ফার্ম্মাসি, ১৫৫নং বহুবাজার ষ্ট্রীট, কলিকাতা।

কালীতন্ত্র—এইরূপ উপাদেয় তন্ত্র এই পর্য্যন্ত আর কোথাও প্রকাশিত হয় নাই। অনেকগুলি প্রাচীন হস্তলিখিত পুঁথি হইতে পাঠ উদ্ধার করিয়া বহু পাঠান্তর, বিস্তৃত সংস্কৃত টীকা ও বঙ্গানুবাদ সহ সংস্কৃতসাহিত্যপরিষৎ হইতে পূর্ণানন্দবংশীয় তান্ত্রিক পণ্ডিত শ্রীযুক্ত সতীশচন্দ্রসিদ্ধান্তভূষণ মহাশয়ের সম্পাদকতায় প্রকাশিত হইয়াছে। কালীর ধ্যানের ব্যাখ্যা সম্বন্ধে নানারূপ মত ভেদ আছে। সেই সকলের মীমাংসাপূর্ব্বক বিস্তৃত ব্যাখ্যা প্রদত্ত হইয়াছে। মূল্য ।৵০ দশ আনা মাত্র। পরিষদের সভ্যগণের পক্ষে ॥০ আট আনা মাত্র।

শঙ্করীসঙ্গীতম্—গীতগোবিন্দের অনুকরণে প্রাচীন কবি জয়নারায়ণের রচিত গীতিকাব্য। মূল্য ।৵০ ছয় আনা, পরিষৎসভ্যের পক্ষে ।০ চারি আনা মাত্র

প্রাপ্তিস্থান—সম্পাদক, সংস্কৃতসাহিত্যপরিষৎ।

শ্যামবাজার, কলিকাতা।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

চ্যবন প্রাশ — ৩৲ সের। [মকরধ্বজ — তোলা ৪৲]

অধ্যক্ষ মথুরবাবুর

ঢাকা শক্তি ঔষধালয়।

(১৩০৮ সনে স্থাপিত)

ঢাকা, কলিকাতা, ময়মনসিংহ, চট্টগ্রাম, শ্রীহট্ট, রঙ্গপুর, গৌহাটী, জলপাইগুড়ি বগুড়া, সিরাজগঞ্জ, কাশী, পাটনা, লক্ষ্ণৌ ও মাদ্রাজ।

কলিকাতা ব্রাঞ্চ — ৫২।১ বিডন ষ্ট্রীট, ২২৭ হ্যারিসন রোড্, ১৩৪ বহুবাজার ষ্ট্রীট, ৭১।১ রসা রোড্ ভবানীপুর।

বিশুদ্ধরক্ত ও সারিবাদ্যরিষ্ট।

সারিবাদ্যরিষ্ট — যকৃতের যে কোনপ্রকার দোষ নিশ্চয় দূরীভূত করে এবং লিভারকে কার্য্যক্ষম রাখিয়া মল মূত্র সহ পিত্ত নিঃসরণ করিয়া পিত্তাধিক্যের সমতা করে। হাত পা জ্বালা চক্ষু জ্বালা দাহ প্রভৃতি বায়ু পিত্ত রোগ দূরীভূত করে। পিত্ত দূষিত হইলে রক্তও দূষিত হয়।

সারিবাদ্যরিষ্ট — সর্ব্ববিধ রক্তদুষ্টি, যথা বাতরক্ত শীতপিত্ত, পাঁচড়া, বিখাজ, কণ্ডু কুষ্ঠ বিসর্প প্রভৃতির মহৌষধ।

সারিবাদ্যরিষ্ট — সর্ব্ববিধ বাতের বেদনা, স্নায়ুশূল, গেটেবাত, আমবাত, ঝিঁঝিঁবাত, বাতব্যাধি প্রভৃতি ঐন্দ্রজালিকের ন্যায় প্রশমিত করে।

সারিবাদ্যরিষ্ট — স্নায়বিক দৌর্ব্বল্যনাশক, জীবনীশক্তি বর্দ্ধক, কর্ম্মোৎসাহ প্রদায়ক। মূত্র ও শুক্র সম্বন্ধীয় পীড়া, শুক্রতারল্য, খড়িগোলার ন্যায় প্রস্রাব এবং স্ত্রীলোকের শ্বেত ও রক্ত প্রদর প্রভৃতি নিশ্চয় আরোগ্য করে।

সারিবাদ্যরিষ্ট — দূষিত সংসর্গজাত বিষাক্ত বীজাণু প্রস্রাবদ্বারের ক্ষত, পুঁজ রক্তপাত, স্ফীতি, বেদনা, পারদবিকৃতি প্রভৃতি মারাত্মক দূষিত ব্যাধি মন্ত্রশক্তির ন্যায় আরোগ্য করে।

সারিবাদ্যরিষ্ট — বালক, বৃদ্ধ, যুবা, স্ত্রী পুরুষ সকলেই সুস্থ অসুস্থ অবস্থায় সকল ঋতুতে সেবন করিতে পারে।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

জবাকুসুম তৈল

গুণে অদ্বিতীয়, গন্ধে অতুলনীয়, শিরোরোগের মহৌষধ। এক শিশি ১৲ টাকা, ৩ শিশি ২॥০, ৬ শিশি ৫৲ টাকা, ১২ শিশি ৯॥০ টাকা, এক গ্রোস ১০৮৲ টাকা, ডাকমাশুল স্বতন্ত্র

সুরবল্লীকষায়

রক্তদুষ্টির মহৌষধ। শরীরের দুর্ব্বলতা দূর করিয়া কান্তি ও পুষ্টি বর্দ্ধনে অদ্বিতীয়। ১ শিশির মূল্য ১৷৷০ দেড় টাকা, ৩ শিশি ৩৷৷০ আনা। ৬ শিশি ৭॥০ সাড়ে সাত টাকা, ডাকমাশুল স্বতন্ত্র।

সি কে সেন এণ্ড কোং লিমিটেড।

২৯নং কলুটোলা ষ্ট্রীট, কলিকাতা।

प्रकाशको मुद्रापकश्च—श्रीजानकीनाथकाव्यतीर्थः।

संस्कृतसाहित्यपरिषद्भवनम्, श्यामबाजार ब्रीजरोड, कलिकाता।

मुद्रणस्थानं—श्रीप्रेस ; १०७, कर्णवालिस ष्ट्रीट, श्यामबाजार, कलिकाता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar